एवं पार्श्वे तु चत्वारो हस्तमेवं प्रकल्पयेत् ॥
शम्भोर्वामाङ्घ्र्यधस्तात्तु गजस्यैव तु मस्तकम् ।
मकुटस्योपरिष्टात्तु गजपुच्छं प्रकल्पयेत् ॥
पार्श्वयोर्गजपादांस्तु यथायुक्त्या तु कल्पयेत् ।
प्रभामण्डलवच्छेषं गजचर्म प्रकल्पयेत् ॥
व्याघ्रचर्माम्बरोपेतं दुकूलवसनान्वितम् ।
सर्वालङ्कारसंयुक्तमतिरक्तसमप्रभम् ॥
एवं तु गजहामूर्तिं प्रथमं तु विधीयते ।
शूलं खड्गं तथा चर्म गजशृङ्गं च दक्षिणे ॥
कपालं खेटकं घण्टां गजचर्म च वामके ।
सुस्थितं वामपादं तु गजस्य मस्तकोपरि ॥
उद्धृतं दक्षिणं पादं तिर्य्यगुत्कुटिकं भवेत् ।
एवं द्विविधरीत्या तु गजहामूर्तिरुच्यते ॥
स्कन्दोद्धृताप्युमादेवी शम्भोर्वामे भयान्विता ।

(अंशुमद्भेदागमे सप्ततितमपटले ॥)

गजहामूर्तिनं वक्ष्ये सर्वाभरणभूषितम् ।
पाशं च गजचर्म च दक्षपार्श्वकरद्वये ॥

गजस्य शृङ्गं चर्म च वामपार्श्वे करद्वये ।
शूलं डमरुकं पाशं गजचर्म च दक्षिणे ॥

गजशृङ्गं कपालं च पाशं चर्म च वामतः ।
शम्भोर्वामे व्य(माङ्कय?)धस्तात्तु गजमस्तकमेव हि ॥

मकुटस्योपरिष्टात्तु गजपुच्छं प्रकल्पयेत् ।
पार्श्वयोर्गळ(ज?)पादं तु यथा युक्त्या तु कारयेत् ॥

प्रभामण्डलवच्छेषं गजचर्म प्रकल्पयेत् ।
व्याघ्रचर्माम्बरोपेतं दुकूलवसनान्वितम् ॥

सर्वाभरणसंयुक्तमतिरक्तप्रभान्वितम् ।
सुस्थितं वामपादं तु गजवीरस्य मस्तके ॥

उद्धृतं दक्षिणं पादं कक्षसूत्रानु(न्त?)माचरेत् ।
गौरी स्कन्दं समुद्धृत्य शम्भोर्वामे भयान्विता ॥

अथवा शूलखड्गौ च गजदन्तं च चर्म च ।
दक्षिणे वामतः कुर्यात् कपालं खेटकं पुनः ॥

घण्टां च गजचर्म च करैरिति...वामतः ।

(शिल्परत्ने द्वाविंशपटले ॥)

कालारिमूर्तिः

अथ वक्ष्ये विशेषेण कालहामूर्तिलक्षणम् ।
देवस्य दक्षिणं पादं पद्मपीठोपरिस्थितम् ॥

प्रथमनृत्तमूर्तेस्तु दक्षिणस्थितपादवत् ।
वामपादं तदुद्धृत्य कुञ्चितं तलमुद्धृतम् ॥

अङ्गुष्ठमुद्धृताङ्गेस्तु कालस्य हृदये न्यसेत् ।
दंष्ट्रास्यं च त्रिनेत्रं च जटामकुटमण्डितम् ॥

चतुर्भुजसमायुक्तमष्टहस्तमथापि वा ।
दक्षिणे पूर्वहस्तं तु शूलं कर्णान्तमुद्धृतम् ॥

दक्षिणे परहस्तं तु परशुं वरदं तथा ।
वामे पूर्वकरं नाभिसीमान्तं सूच्यधोमुखम् ॥

वामे त्वपरहस्तं तु विस्मयं परिकल्पयेत् ।
हिक्कासूत्रसमं टङ्ककरं त्वभ्यन्तरं मुखम् ॥

उष्णीषान्तं समुद्धृत्य विस्मयेऽनामिकाग्रकम् ।
कर्णान्तं मणिबन्धान्तं शूलहस्तसमान्तकम् ॥

चतुर्दोर्ष्वेवमाख्यातमष्टहस्तमथ शृणु ।
शूलं परशु वज्रं च खड्गं दक्षिणहस्तके ॥

विस्मयं खेटकं पाशं सूचीहस्तं तु वामके ।
विद्रुमस्य निभाकारं सर्वाभरणभूषितम् ॥

कालहामूर्तिमाख्यातमधस्तात्काल उच्यते ।
द्विभुजं च द्विपादं च सदंष्ट्रं पाशपाणिनम् ॥

करण्डमकुटोपेतमसृग्धाराविकीर्णितम् ।
महाभयसमायुक्तं सपाशहृदयाञ्जलिम् ॥

विकीर्णपादं मां दृष्ट्वा शाययेदूर्ध्ववक्त्रकम् ।
कालहामूर्तिमेवं तु प्रोक्तं लिङ्गोद्भवं ततः ॥

(अंशुमद्भेदागमे षट्सप्ततितमपटले ॥)

कुञ्चितासव्यपादस्तु व्याघ्रचर्माम्बरान्वितः ।
ततोद्धृतसदक्षाङ्घ्रिस्तीक्ष्णदंष्ट्रोग्रनासिकः ॥

दक्षहस्तस्थशूलो वा वामहस्तस्थसूचिकः ।
दक्षहस्तस्थपरशुर्नागपाशोऽथवा मृगः ॥

कटाक्षदृष्टिर्देवस्य कालदेहव्यवस्थितः ।
शूलं ह्यधोमुखं प्रोक्तं कालकु(ग?)ण्डस्थमेव वा ॥

कालं तु पतितं कुर्यात्त(द्रु?)त्प्लुताक्षं तु मूर्छितम् ।
मुद्गरं र(उद्गिरद्?)क्तवक्त्रं च तथा लोहितमूर्धजम् ॥

शूलपाशकरं चैव विकीर्णचरणान्वितम् ।
दंष्ट्राकरालवदनं रक्तभ्रूरक्तलोचनम् ॥

देवस्य(स्य?) नाभिमानेन नवतालेन कारयेत् ।
कृताञ्जलिपुटं वापि कारयेत्कालमादरात् ॥

अथवाथ हराल्लिङ्गान्निर्गतात्पतितं नयेत् ।
कालान्त(लं तं ?) लिङ्गमानाद्यं लिङ्गोद्भूतोक्तवन्नयेत् ॥
त्रिभङ्गेन स्थितश्चान्योऽधोमुखो भस्मविग्रहः ।
बद्धपुष्पाञ्जलिः पार्श्वे मार्कण्डेयः स्थितो वरः ॥
कर्तव्यः कालतो भू(भी ?)तस्सन्तुष्टो न हरेण तु ।
मार्कण्डेयेन मानेन युक्तो वा वर्जितस्तु वा ॥
अपस्मारशरीरस्थचरणेन युतो न वा ।
कालारिरेवमाख्यातो मन्मथान्तक उच्यते ॥

(उत्तरकामिकागमे सप्तपञ्चाशत्तमपटले ॥)

दक्षिणे तु करे शूलं वामे सूच्यङ्गुलि स्मृतम् ।
पादं कालस्य हृदये न्यस्त्वैवं (स्यैवं ?) पादसंस्थितम् ॥
कालनाशमिदं प्रोक्तं लिङ्गोत्पत्तिमतः परम् ।

(सुप्रभेदागमे चतुस्त्रिंशत्तमपटले ॥)

कालारिं कारयेदीशं नताङ्गं वामतो मनाक् ।
सुस्थितं दक्षिणं पादं पद्मपीठेऽन्यमङ्घ्रिकम् ॥
दक्षिणे पूर्वहस्ते तु शूलं कर्णान्तमुद्धृतम् ।
दक्षिणे परहस्ते तु परशु वरदं तु वा ॥
वामे पूर्वकरं नाभिसूत्रान्ते सूचिमाचरेत् ।
वामे तु परहस्ते तु विस्मयं परिकल्पयेत् ॥

उष्णीषान्तं समुद्धृत्य विस्मयेऽनामिकाग्रकम् ।
शूलं परशुवज्रौ च खड्गं दक्षिणहस्तके ॥
विस्मयं खेटकं पाशं सूचीहस्तं च वामके ।
शुद्धविद्रुमसङ्काशं सर्वाभरणसंयुतम् ॥
अधस्तात्कारयेत्कालं द्विभुजं पाशहस्तकम् ।
करण्डमकुटोपेतं सदंष्ट्रं विकृताननम् ॥
असृग्धारासमायुक्तं महाभयसमन्वितम् ।
हृदयाञ्जलिसंयुक्तं विकीर्णाङ्घ्रिद्वयं पुनः ॥

(शिल्परत्ने द्वाविंशपटले ॥)

चतुर्भुजं त्रिनेत्रं च जटामकुटसंयुतम् ।
उद्धृतं दक्षिणं पादं वामपादं तु कुञ्चितम् ॥
व्याघ्रचर्माम्बरोपेतं तीक्ष्णनासोग्रदंष्ट्रकम् ।
दक्षिणे तु करे शूलं सूचिहस्तं तु वामके ॥
परशुं दक्षिणे हस्ते नागपाशं तु वामके ।
अधोमुखं भवेच्छूलं दृष्टिर्वै कालदेहके ॥
अपरे तु द्विहस्तौ तु कटकाविति कीर्तितौ ।
दोस्समं कटकाग्रं तु ह्यन्तरं तु यवं भवेत् ॥

(पूर्वकारणागमे एकादशपटले ॥)

त्रिपुरान्तकमूर्तिः । (१)

त्रिपुरान्तकमूर्तेस्तु लक्षणं वक्ष्यतेऽधुना ।
दक्षिणं सुस्थितं पादं वामपादं तु कुञ्चितम् ॥

दक्षिणे पूर्वहस्तोर्ध्वे नाभिसूत्रावसानकम् ।
सिंहकर्णं तु तद्धस्तं बाणमध्यं तु पीडितम् ॥

बाणायामं तु तत्सप्तत्यङ्गुलं तु विधीयते ।
कनिष्ठिकापरीणाहं देवेशस्य करस्य तु ॥

वामहस्ते धनुर्धृत्वा कक्षान्तं तत्करोर्ध्वकम् ।
पूर्णमुष्टिस्तु नाहं स्यान्मध्यादग्रौ क्रमात्कृशौ ॥

अग्रमर्धाङ्गुलव्यासं वृत्तं वर्णैर्विचित्रितम् ।
बाणनाहत्रिभागैकं रज्जुनाहं तु तन्तुना ॥

धनोर्दीर्घाष्टभागे तु सप्तांशं रज्जुदीर्घकम् ।
तद्दीर्घस्यानुकूलं तु धनोर्वक्रमुदाहृतम् ॥

त्रिवक्रसहितं वाथ बालचन्द्राभमेव वा ।
धनुराकृतिरेवं स्यात् दारुजं लोहजं तु वा ॥

कर्तरी परहस्तौ तु टङ्ककृष्णमृगान्वितौ ।
गङ्गं(टङ्कं ?) दक्षिणहस्ते तु वामहस्ते मृगं धृतम् ॥

जटामकुटसंयुक्तं सर्वाभरणभूषितम् ।
प्रवालसदृशप्रख्यं वामे गौरीसमायुतम् ॥

त्रिपुरान्तकमूर्तेस्तु प्रथमं लक्षणं त्विदम् ।

(अंशुमद्भेदागमे सप्तषष्टितमपटले ॥)

पुरारिस्थापनं वक्ष्ये तदादौ लक्षणं च वै ।
चतुर्भुजास्त्रिनेत्रश्च जटामकुटसंयुतः ॥
समभाग(भङ्ग ?)युतस्सम्यक् स्थापकेन समन्वितः ।
सव्यकर्णस्थमकरकुण्डलेन समन्वितः ॥
कृष्णापरशुसंयुक्तपरहस्तद्वयान्वितः ।
धनुर्बाणयुतोपेतवामेतरकरान्वितः ॥
परहस्तोज्झितो वाथ द्विहस्तस्त्रिपुरान्तकः ।
कुर्यात्सलक्षणं वाथ वामभागे तु पार्वतीम् ॥
एवं कृत्वा पुरारिं तु प्रतिष्ठां कारयेत्ततः ।

(उत्तरकामिकागमे एकोनपञ्चाशत्तमपटले ॥)

धनुर्बाणसमायुक्तं कृष्णा परशुधारिणम् ।
उमया सहितं देवं कृत्वा तत्त्रिपुरान्तकम् ॥

(सुप्रभेदागमे चतुस्त्रिंशत्तमपटले ॥)

अथाष्टधा प्रवक्ष्यामि त्रिपुरान्तकमूर्तिनम् ।
दक्षिणं सुस्थितं पादं वामपादं तु कुञ्चितम् ॥
दक्षिणे पूर्वहस्तं तु नाभिसूत्रावसानके ।
सिंहकर्णं तु तद्धस्तं बाणमध्यनिपीडितम् ॥

वामहस्ते धनुर्धृत्वा कक्षान्तोर्ध्वं समुद्धृते ।
कर्तरी परहस्तौ द्वौ टङ्ककृष्णमृगास्थितौ(गान्वितौ ?)
टङ्कं तु दक्षिणे वामे कृष्णसारङ्गमेव हि ।
जटामकुटसंयुक्तं सर्वाभरणभूषितम् ॥
प्रवालसदृशप्रख्यं वामे गौरीसमायुतम् ।
इदं प्रथममाख्यातं द्वितीयं तु ततः परम् ॥

(शिल्परत्ने द्वाविंशपटले ॥)

चतुर्भुजं त्रिनेत्रं च जटामकुटसंयुतम् ।
सर्वाभरणसंयुक्तं दिव्याम्बरसमायुतम् ॥
पत्रं तु वामकर्णे तु दक्षिणे कुण्डलान्वितम् ।
धनुर्बाणसमायुक्तं कृष्णापरशुसंयुतम् ॥
उपवीतसमायुक्तं सभङ्गस्थानकं कुरु ।
वृषवाहनवच्छेषं कारयेत्तु विचक्षणः

(पूर्वकारणागमे एकादशपटले ॥)

त्रिपुरान्तकमूर्तिः । (२)

तदेव वामपादं तु अपस्मारोपरिस्थितम् ।
शेषं प्रागिव कर्तव्यं द्वितीयं लक्षणं भवेत् ॥

(अंशुमद्भेदागमे सप्तषष्टितमपटले ॥)

तदेव वामपादं तदपस्मारोपरिस्थितम् ।
शेषं प्रथमतुल्यं हि तृतीयमथ वक्ष्यते ॥

(शिल्परत्ने द्वाविंशपटले ॥)

त्रिपुरान्तकमूर्तिः । (३)

सुस्थितं वामपादं तु दक्षिणं कुञ्चितं भवेत् ।
शेषं प्रागिव कर्तव्यं सूत्रं त्वितरपार्श्वगम् ॥
तृतीयं लक्षणं प्रोक्तं चतुर्थं लक्षणं शृणु ।

(अंशुमद्भेदागमे सप्तषष्टितमपटले ॥)

सुस्थितं वामपादं तु दक्षिणं कुञ्चितं भवेत् ।
शेषं प्रागिव कर्तव्यं चतुर्थं तु ततः परम् ॥

(शिल्परत्ने द्वाविंशपटले ॥)

त्रिपुरान्तकमूर्तिः । (४)

तदेव वामपादं तु अपस्मारोपरिस्थितम् ।
प्रागिवैव विशेषं तु चतुर्थं लक्षणं भवेत् ॥

(अंशुमद्भेदागमे सप्तषष्टितमपटले ॥)

तदेव वामपादं तदपस्मारोपरिस्थितम् ।

(शिल्परत्ने द्वाविंशपटले ॥)

त्रिपुरान्तकमूर्तिः । (५)

तदेव पूर्वहस्तौ द्वौ कटकौ हृदि सीमगौ ।
वामदक्षिणहस्तौ द्वौ क्रमादूर्ध्वमधोमुखम् ॥
बाणमूलधृतं सव्यं वामं बाणाग्रकं धृतम् ।
परे तु दक्षिणे टङ्कं धनुस्तद्वामहस्तके ॥
तद्धस्ते तु मृगं वाथ वामे गौरीसमायुतम् ।
अपस्मारं विना पादं नतं प्रागिव सूत्रकम् ॥
एवं चतुर्भुजोपेतं मूर्तिं पञ्चविधं भवेत् ।

(अंशुमद्भेदागमे सप्तषाष्टितमपटले ॥)

तदेव पूर्वहस्तौ द्वौ कटकौ हृदि सीमगौ ।
वामं दक्षिणकं हस्तं क्रमादूर्ध्वमधोमुखम् ॥
बाणमूलधृतं सव्यं अन्यबाननोद्धृतम् (?) ।
परे दक्षिणके टङ्कं धनुषं वामहस्तके ॥
तद्धस्ते तु मृगं वाथ वामे गौरीसमायुतम् ।
अपस्मारं विना कार्यं पञ्चमं समुदाहृतम् ॥

(शिल्परत्ने द्वाविंशपटले॥)

त्रिपुरान्तकमूर्तिः । (६)

अतिभङ्गनतोपेतमष्टहस्तसमन्वितम् ।
बाणं च परशुं खड्गं वज्रं वै दक्षिणे करे ॥

धनुषं विस्मयं हस्तं खेटकं कटकं तु वा ।
वामहस्ते समाख्यातं पूर्वसूत्रात्करान्तकम् ॥
यथाशोभनतं तुङ्गं कल्पयेद् गौरिसंयुतम् ।

(अंशुमद्भेदागमे सप्तषष्टपटले ॥)

षष्ठमिष्टं च बाणं च पाशं खड्गं च दक्षिणे ।
धनुषं विस्मयं खेटं कुक्कुटं(कटकं ?) वामहस्तके ॥
यथाशोभं तथा कुर्याद्वामे गौरीसमायुतम् ।

(शिल्परत्ने द्वाविंशपटले ॥)

त्रिपुरान्तकमूर्तिः । (७)

षष्ठमं ह्येवमाख्यातं सप्तमं दशदोर्युतम् ।
बाणं चक्रं तथा शूलं टङ्कं वज्रं च दक्षिणे ॥
धनुश्शङ्खं तथा सूची विस्मयं खेटकं तथा ।

(अंशुमद्भेदागमे सप्तषष्टितमपटले ॥)

सप्तमे दक्षिणे बाणं चक्रं शूलं ततः परम् ।
टङ्कं वज्रं तथा वामे धनुषं सूचिविस्मये ॥
खेटान्द्र............सर्वं पूर्ववदाचरेत् ।

(शिल्परत्ने द्वाविंशपटले ॥)

त्रिपुरान्तकमूर्तिः । (८)

तदेव दक्षिणं जानु ततो(लो?)परि निधापयेत् ।
तत्पूर्वे वामपादं तु तलं न्यस्त्वा रथोपरि ॥
रथं तु मुकुळोपेतं मुकुळं रज्जुना वृतम् ।
मुकुळाभ्यन्तरे ब्रह्मा चतुर्वक्त्रश्चतुर्भुजः ॥
तस्य दक्षिणहस्तौ द्वौ वेणुदण्डं कमण्डलुम् ।
कुण्डिका पद्मपाशं च वामहस्तद्वयोद्धृतम् ॥
रथस्य मुकुळाधस्ताद्वृषभं श्वेतवर्णकम् ।
रथं पवनमार्गेण कल्पयेत्कल्पवित्तमः ॥
त्रिपुरान्तकमाख्यातमष्टभेदं द्विजोत्तम ! ।
प्रवालसदृशं वर्णं सत्वराजसमिश्रितम् ॥
सर्वाभरणसंयुक्तमेकवक्त्रं त्रिनेत्रकम् ।
तस्य वामेऽप्युमादेवीं प्रागुक्तविधिना कुरु ॥
सामान्यलक्षणं वर्ण्यं त्रिपुरान्तकमूर्तिनः ।

(अंशुमद्भेदागमे सप्तषष्टपटले ॥)

एवमेवाष्टमं कुर्याद्वसुधोपरि विन्यसेत् ।
दक्षिणाङ्घ्रिस्तथा जानु वामपादतलं पुनः ॥
पुरस्स्थितरथस्योर्ध्वे विन्यसेत्तु यथोचितम् ।
रथं तु मुकुलोपेतं मुकुलं कञ्ज(रज्जु?)नावृतम् ॥

मुकुलाभ्यन्तरे ब्रह्मा चतुर्वक्त्रश्चतुर्भुजः ।
तस्य दक्षिणहस्तौ द्वौ वेणुदण्डं कमण्डलुम् ॥
कुण्डिकां पद्मपाशं च वामहस्तद्वयोद्धृतम् ।
रथस्य मुकुलाधस्ताद्वृषभं श्वेतवर्णकम् ॥
(शिल्परत्ने द्वाविंशपटले ॥)

शरभेशः ।

शरभेशप्रतिष्ठां तु वक्ष्ये लक्षणपूर्विकाम् ।
पक्ष्याकारं सुवर्णाभं पक्षद्वयसमान्वितम् ॥
ऊर्ध्वपक्षसमायुक्तं रक्तनेत्रद्वयान्वितम् ।
पादैस्सिंहपदाकारैश्चतुर्भिश्च समन्वितम् ॥
सुतीक्ष्णनखसंयुक्तैरूर्ध्वस्थैर्वेदपादकैः ।
दिव्यलाङ्गूलसंयुक्तं सुविकीर्णजटान्विम् ॥
कन्धरोर्ध्वनराकारं दिव्यमौलिसमायुतम् ।
सिंहास्यं भीमदंष्ट्रं च भीमविक्रमसंयुतम् ॥
हरन्तं नरसिंहं तु जगत्संहरणोद्धृतम् ।
कृताञ्जलिपुटोपेतं निश्चेष्टितमहातनुम् ॥
नरदेहं तदूर्ध्वास्यं विष्णुं पद्मदलेक्षणम् ।
पादाभ्यामम्बरस्थाभ्यां कुक्षिस्थाभ्यां च तस्य तु ॥
गगनाभिमुखं देवं कारयेच्छरभेश्वरम् ।
(उत्तरकामिकागमे चतुःपञ्चाशत्तमपटले ॥)

शरभमूर्तिः ।

महामेरुसमाकारमष्टपादं रविप्रभम् ।
द्वात्रिंशद्बाहुसंयुक्तं सूर्यसोमाग्निलोचनम् ॥
दुर्गाकालद्विपक्षं च सुतीक्ष्णघनगर्जितम् ।
ऊर्ध्वकेशं महाबाहुं नानालङ्कारभूषितम् ॥
वज्रमुष्टयभयं चक्रं शक्तिं दण्डाङ्कुशौ तथा ।
खड्गखट्वाङ्गपरशूनक्षमालास्थिशूलकम् ॥
धनुश्च मुसलं चाग्निं दधानं दक्षिणैः करैः ।
वरदं पाशहस्तं च गदां बाणध्वजौ तथा ॥
क्रकचं क्रोडशङ्खौ च खेटं नागं च पङ्कजम् ।
कपालं पुस्तकं कुन्तं दुर्गाश्लिष्टकराम्बुजम् ॥
हलं वामे दधानं च भीषणं करपङ्कजैः ।
दंष्ट्रोल्लासं महासिंहजटाच्छटनिपीडितम् ॥

(श्रीतत्वनिधौ ॥)

ब्रह्मशिरश्छेत्तृमूर्तिः ।

गौरवर्णं त्रिनेत्रं च जटामौलिविराजितम् ।
ताटङ्कं कुण्डलं सव्यवामश्रुत्योश्च बिभ्रतम् ॥
व्याघ्रचर्माम्बरधरं चतुर्भुजसमन्वितम् ।
वज्रं परशुपूर्वासं वामे ब्रह्मकरोटिकम् ॥

अपरे शूलहस्तं च शेषं पूर्वोक्तवत्कुरु ।

(श्रीतत्वनिधौ ॥)

भैरवः ।

अथातो रूपनिर्माणं वक्ष्येऽहं भैरवस्य तु ।

लम्बोदरं तु कर्तव्यं वृत्तपिङ्गललोचनम् ॥

दंष्ट्राकरालवदनं फुल्लनासापुटं तथा ।

कपालम(मा ?)लिनं रौद्रं सर्वतस्सर्पभूषणम् ॥

व्यालेन त्रासयन्तं च देवीं पर्वतनन्दिनीम् ।

सजलाम्बुदसङ्काशं गजचर्मोत्तरच्छदम् ॥

बहुभिर्बाहुभिर्व्याप्तं सर्वायुधविभूषणम् ।

बृहत्सालप्रतीकाशैस्तथा तीक्ष्णनखैश्शुभैः ॥

साचीकृतमिदं रूपं भैरवस्य प्रकीर्तितम् ।

(विष्णुधर्मोत्तरे ॥)

वटुकभैरवः ।

खट्वाङ्गमांसपाशं च शूलं च दधतं करैः ।

डमरुं च कपालं च वरदं भुजगं तथा ॥

आत्मवर्णसमोपेतसारमेयसमन्वितम् ।

ध्यात्वा जपेत्सुसंहृष्टः सर्वान्कामानवाप्नुयात् ॥

(रूपमण्डने ॥)

विकीर्णलोहितजटं त्रिनेत्रं रक्तविग्रहम् ।
शूलं कपालं पाशं च डमरुं दधतं करैः ॥

नानारूपैः पिशाचैश्च नानारूपगणैर्वृतम ।
श्वानारूढं च निर्वाणं वटुकं भैरवं भजे ॥

(वटुकभैरवकल्पे ॥)

स्वर्णाकर्षणभैरवः ।

पीतवर्णं चतुर्बाहुं त्रिनेत्रं पीतवाससम् ।
अक्षय्यस्वर्णमाणिक्यगणपूरितपात्रकम् ॥

अंसाहितमहाशूलचामरं तोमरोद्वहम् ।
सन्ततं चिन्तयेद्भक्त्या भैरवं सर्वसिद्धिदम् ॥

नानाभरणशोभाढ्यमानन्दसुखरूपिणम् ।
मदोन्मत्तं सदानन्दं सर्वदेवनमस्कृतम् ॥

एवं ध्यायेच्च मन्त्रज्ञः स्वर्णाकर्षणभैरवम् ।

(श्रीतत्वनिधौ ॥)

अष्टाष्टभैरवाः ।

इतः परं प्रवक्ष्यामि श्रृणु राजन्नशेषतः ।
अष्टाष्टकमिदं पुण्यं भैरवाणामभीष्टदम् ॥

पूर्ववद्वर्णतो ध्याने ध्येयं सर्वैः पृथक्पृथक् ।

प्रथमाष्टकम् ।

आद्याष्टकं सुवर्णाभं त्रिशूलं डमरुं तथा ॥
पाशं चासिं दधानं च ध्यायेत्सर्वाङ्गसुन्दरम् ।

द्वितीयाष्टकम् ।

अथ द्वितीयकं ध्यायेदक्षमालामथाङ्कुशम् ।
दधानं पुस्तकं वीणां सुखेतमणिभूषणम् ॥

तृतीयाष्टकम् ।

ज्वालां शक्तिं गदां कुन्तं दधानं नीलवर्णकम् ।
ध्यायेत्तृतीयं शुभदमष्टकं शुभलक्षणम् ॥

चतुर्थाष्टकम् ।

खड्गं खेटं पट्टसं च दधानं परशुं तथा ।
धूम्रवर्णमभिप्रेतं ध्यायेदष्टकमादरात् ॥

पञ्चमाष्टकम् ।

कुन्तं खेटं च परिघं भिण्डिपालं तथैव च ।
पञ्चमाष्टकमेतद्धि श्वेतं स्यात्सुमनोहरम् ॥

षष्ठसप्तमाष्टमाष्टकानि ।

पीतष्षष्ठमृषीरक्तमष्टमं च तटित्प्रभम् ।
पञ्चमाष्टकमेतद्धि श्वेतं स्यात्सुमनोहरम् ॥
कुन्तादिकं समं प्रोक्तं षडारभ्याष्टमान्तकम् ।

अष्टाष्टभैरवनामानि ।

असिताङ्गो विशालाक्षो मार्ताण्डो मोदकप्रियः ।
स्वच्छन्दो विघ्नसंतुष्टः खेचरः सचराचरः ॥

रुरुश्च क्रोडदंष्ट्रश्च तथैव च जटाधरः ।
विश्वरूपो विरूपाक्षो नानारूपधरः परः ॥

वज्रहस्तो महाकायश्चण्डश्च प्रलयान्तकः ।
भूमिकम्पो नीलकण्ठो विष्णुश्च कुलपालकः ॥

मुण्डपालः कामपालः क्रोधो वै पिङ्गलेक्षणः ।
अभ्ररूपो धरापालः कुटिलो मन्त्रनायकः ॥

रुद्रः पितामहाख्यश्चाप्युन्मत्तो वटुनायकः ।
शङ्करो भूतवेतालस्त्रिणेत्रस्त्रिपुरान्तकः ॥

वरदः पर्वतावासः कपालः शशिभूषणः ।
हस्तिचर्माम्बरधरो योगीशो ब्रह्मराक्षसः ॥

सर्वज्ञः सर्वदेवेशः सर्वभूतहृदिस्थितः ।
भीषणाख्यो भयहरः सर्वज्ञाख्यस्तथैव च ॥

कालाग्निश्च महारौद्रो दक्षिणो मुखरोऽस्थिरः ।
संहारश्चातिरिक्ताङ्गः कालाग्निश्च प्रियङ्करः ॥

घोरनादो विशालाक्षो योगीशो दक्षसंस्थितः ।

(श्रीतत्वनिधौ)

वीरभद्रमूर्तिः ।

चतुर्भुजं त्रिणेत्रं च जटामकुटसंयुतम् ।
दक्षिणे खड्गबाणौ च वामे चापं गदां धरम् ॥
दंष्ट्राकरालवदनं भीमं भैरवगर्जितम् ।
रुण्डमालासमायुक्तं पादुकोपरिसुस्थितम् ॥
भद्रकालीसमायुक्तं करालं हृदि विन्यसेत् ।

दक्षब्रह्मस्वरूपम् ।

वीरस्य दक्षभागे तु दक्षब्रह्माणमास्थितम् ।
अजवक्त्रं द्विनयनं शृङ्गद्वयविभूषितम् ॥
नमस्काराञ्जलिं विप्रं शिवध्यानपरायणम् ।

(श्रीतत्त्वनिधौ ॥)

अथ वक्ष्ये विशेषेण वीरभद्रेश्वरं शृणु ।
महापातकदोषघ्नं सर्वपीडानिवारणम् ॥
वीरभद्रमिति ख्यातं दक्षयज्ञहरं परम् ।
चतुर्भुजं त्रिणेत्रं च ज्वालाकेशं सुदंष्ट्रिणम् ॥
घण्टामालाधरं घोरं शिरोमालाविभूषितम् ।
वृश्चिकाभरणं चैव नागयज्ञोपवीतिनम् ॥
नूपुरं विमलं तद्वत्पादौ पादुकभूषितौ ।
नीलकण्ठं च त्र्यक्षं च ऊरुकञ्चुकसंयुतम् ॥

खड्गखेटधनुर्बाणं कपालं भिण्डिपालकम् ।
रक्तवर्णसमायुक्तमुग्रदृष्टिभयङ्करम् ॥

एवं ध्यात्वा विशेषेण प्रतिष्ठां कारयेत्ततः ।

(उत्तरकारणागमे ॥)

जलन्धरहरमूर्तिः ।

रक्ताभमुग्रनयनं द्विभुजं च त्रिनेत्रकम् ।
उपवीतसमायुक्तं सर्वालङ्कारशोभितम् ॥

पादयोः पादुकायुक्तं किञ्चिद्वै गमनोन्मुखम् ।
दक्षहस्ते स्थितं छत्रं वामे पूर्णकमण्डलुम् ॥

सुविकीर्णजटाभारं गङ्गाचन्द्रसमन्वितम् ।
कर्णकुण्डलसंयुक्तं हारनूपुरसंयुतम् ॥

द्विभुजं च त्रिनेत्रं च किरीटकटकान्वितम् ।
सर्वालङ्कारसंयुक्तं कक्षे खड्गसमन्वितम् ॥

कृताञ्जलिपुटोपेतहस्ते चक्रं दधं परम् ।
जलन्धरमथ प्रोक्तम् ॥

(श्रीतत्वनिधौ ॥)

मञ्जारिशिवः ।

मकुटमणिमयूखप्रोज्झिताशेषरत्नं
विमलशशिकलाङ्कं सुन्दरेन्दीवराक्षम् ।

अनुकृतशशितेजःकुण्डलं चारुहासं
प्रकटदशनशोभानिर्जितानेकहीरम् ॥
अभिनवमणिमुक्ताहारचाम्पेयमाला-
विविधकुसुमगुच्छैः शोभिवक्षस्स्थलाढ्यम् ।
सफणपवनभुग्दोर्दण्डभूषाभिरामं
करडमरुनिनादैः पूरितघोरखगर्भम् ॥
त्रिभुवनभवनेशं पीतकौशेयवासं
दनुजदहनदक्षं प्रस्फुरत्खड्गहस्तम् ।
भुजगफणसुगुप्तैर्भूषणैर्न्यस्तभूषं
प्रणतसुरकिरीटव्याप्तपादारविन्दम् ॥
सितहयवरपत्रं हारसंभूषिताङ्गं
परिवृतमतिघोरैः सप्तभिस्सारमेयैः ।
कनकगिरिसमाभं नैशचूर्णाभिरामं
सकलनिगमगुह्यं नौमि मल्लारिदेवम् ॥

(मल्लारिमाहात्म्ये ॥)

अष्टभुजाघोरमूर्तिः ।

अथ वक्ष्ये विशेषेण सर्वलोकैकपावनम् ।
सर्वयुद्धजयं चैव ब्रह्महत्यादिनाशनम् ॥

महापातकदोषघ्नं गुरुद्रोहनिवारणम् ।
शिवद्रव्यापहारं च उपपातकनाशनम् ॥
सर्वैश्वर्याभिवृद्ध्यर्थं परमोक्षनिरासनम् ।
अघोरास्त्रेश्वरं भीमं स्थापनं वक्ष्यते शृणु ॥
त्रिनेत्राष्टभुजं भीममुग्रदंष्ट्राकरालकम् ।
कालमेघसमं घोरं रक्तवस्त्रसमन्वितम् ॥
ज्वालाकेशसमायुक्तं कृशानुनयनैर्युतम् ।
अर्धचन्द्राकृतिं भस्म ललाटोपरिशोभितम् ॥
भुजाभ्यां त्रिशिखा तिर्यक् वेतालं खड्गमेव च ।
डमरुं च कपालं च खेटकं खड्गमेव च ॥
रक्तवस्त्राम्बरोपेतं रक्तपुष्पसमन्वितम् ।
रक्ताभरणसंयुक्तं खड्गमालाविभूषितम् ॥
शिरोमालाविभूष्यं च नागयज्ञोपवीतिनम् ।
वृश्चिकाभरणं कण्ठे कालाग्निसदृशप्रभम् ॥
एवं ध्यात्वा महाघोरं द्वात्रिंशल्लक्षणान्वितम् ।
पद्मपीठोपरिस्थं च समीपे वृषभं तथा ॥
एवं संकल्प्य विधिवत् प्रतिष्ठां कारयेत्ततः ।

(उत्तरकारणागमे ॥)

द्वात्रिंशद्भुजाघोरमूर्तिः ।

एकवक्त्रं सदानन्दं द्वात्रिंशद्भुजसंयुतम् ।
जटामकुटसंयुक्तं त्रिनेत्रं चन्द्रशेखरम् ॥

अभयं खड्गशूलं च चक्रं डमरुकं तथा ।
दधानमस्थिबाणौ च गदां पद्मं कपालकम् ॥

ज्ञानमुद्रां कुन्तहस्तमङ्कुशं चाक्षमालिकाम् ।
खट्वाङ्गं परशुं चैव दधानं दक्षिणैः करैः ॥

वरं च फलकं चैव टङ्कं पाशं च मुद्गरम ।
नागमग्निं मृगं घण्टां धनुश्च कटिहस्तकम् ॥

रत्नं च कुमुदं कुम्भं मुसलं पुस्तकं तथा ।
एतदायुधसंयुक्तं रुण्डमालाविभूषितम् ॥

कालमुण्डस्य शिरसि स्थितं सर्वाभयप्रदम् ।

(शिवतत्त्वरत्नाकरे ॥)

दशभुजाघोरमूर्तिः ।

परशुं डमरुं खड्गखेटौ बाणशरासने ।
शूलं कपालमभयवरौ दधतमिष्टदम् ॥

त्रिलोचनं भीषणास्यं नीलाङ्गं रक्तवाससम् ।
अहिभूषि[त*]सर्वाङ्गं तमघोरमुपास्महे ॥

(पाञ्चरात्रे ॥)

महाकालो घनश्यामः काल्यालिङ्गितविग्रहः ।
श्यामकञ्चुकधारी च मदारुणविलोचनः ॥
ब्रह्माण्डचषके पूर्णे पिबन्विश्वरसासवम् ।
महाकालीं घनश्यामामनङ्गार्द्रामपाङ्गयन् ॥
सिंहासने समासीनः कल्याणकलनात्मके ।
कालमृत्युमुखैर्युक्तस्सर्वलोकैकभक्षकः ॥
ललिताध्यानसंपन्नो ललितापूजनोत्सुकः ।
वितन्वन्ललिताभक्तेष्वायुषो दीर्घदीर्घताम् ॥

(ललितोपाख्याने ॥)

अनुग्रहमूतयः।

अनुग्रहमूर्तयः ।

चण्डेशानुग्रहमूर्तिः ।

अथ वक्ष्ये विशेषेण चण्डेशानुग्रहं परम् ।
उमासहितवत्सर्वं वामे किंचिन्नताननम् ॥

दक्षिणे त्वभयं वर्ज्यं तद्धस्तं वरदं भवेत् ।
वामे तु कटकं वर्ज्यं तं न्यस्त्वा चण्डमूर्धनि ॥

हृदयेऽञ्जलिसंयुक्तश्चण्डेशो भक्तिसंयुतः ।
आसीनः पद्मपीठे तु चण्डेशस्स्वर्णसन्निभः ॥

देवीदेवेशयोर्मध्ये स्कन्दमूर्तिं विना बुधाः ! ।
चण्डेशानुग्रहं ख्यातं दक्षिणामूर्तिरुच्यते ॥

(अंशुमद्भेदागमे पञ्चसप्ततितमपटले ॥)

उमया सहितस्याथ चन्द्रशेखरमूर्तिनः ।
वामे वा दक्षिणे वापि कारयेद्देशिकोत्तमः ॥

एवं(देवं ?) जानूरुनाभ्यन्तस्तनवक्षोगलास्यगम् ।
सुखासीनं स्थितं वापि कृताञ्जलिपुटान्वितम् ॥

देवेक्षणसमोपेतं मद्भक्तं चण्डनायकम् ।
सर्वाङ्गसुन्दरं कुर्यात्कनिष्ठदशतालतः ॥
मालाग्रं देववरदे कटकेनेतरेण तु ।
देवशिरसि चण्डस्य मालया परिवेष्टयेत् ॥

(उत्तरकामिकागमे पञ्चपञ्चाशत्तमपटले ॥)

चण्डेशानुग्रहं देवमुमास्कन्दवदाचरेत् ।
वाम(मे ?) किंचिन्नतं चास्यं दक्षिणे त्वभयं विना ॥
तद्धस्ते वरदं कार्यं वामे तु कुटं(कटकं ?) विना ।
चण्डेशमूर्ध्नि विन्यस्य तद्धस्तं करुणान्वितम् ॥
हृदयेऽञ्जलिसंयुक्तश्चण्डेशो भक्तिसंयुतः ।
आसनाधस्तु(?)पासीनो भक्तिमान् स्वर्णसन्निभः ॥

(शिल्परत्ने द्वाविंशपटले ॥)

उमासहितवत्सर्वं स्कन्देनैव विना कुरु ।
किंचिदस्मिन् विशेषोऽस्ति तं विशेषं शृणु द्विजाः ! ॥
कटकं दक्षिणे हस्तं वरदं वामहस्तके ।
देवस्य पुरभागं तु चण्डेशं तु प्रकल्पयेत् ॥
देवस्य बाहुमात्रेण चण्डेशायाममुच्यते ।
कृताञ्जलिपुटोपेतं चासीनं प्रतिवक्त्रकम् ॥

देवाशिरसि चण्डस्य मालया परिभूषयन् ।
चण्डेशानुग्रहं प्रोक्तं मुखलिङ्गं पुरोक्तवत् ॥

(पूर्वकारणागमे एकादशपटले ॥)

विष्ण्वनुग्रहः ॥

नन्दीशानुग्रहस्त्वेवं तद्वद्विष्णुप्रसादकृत् ।
हित्वा नन्दीश्वरं तस्मिन्विष्णुं तल्लक्षणान्वितम् ॥
सचक्राञ्जलिहस्तं च शङ्खाब्जापरहस्तकम् ।
कारयेद्देव एव स्याच्चक्रदो विष्णुमूर्तिनः ॥
कारयेदेवमेवान्यप्रसादाभिमुखं शिवम् ।

(उत्तरकामिकागमे पञ्चपञ्चाशत्तमपटले ॥)

विष्णुस्त्वीशपुरःस्थितोऽञ्जलिकरो देवस्य पादाब्जयो-
स्संस्थाप्याक्षिलसत्सुमाल्यमनिशं पीताम्बरं कौस्तुभम् ।
यस्तस्मै दयया परं पशुपतिं पद्माक्ष इत्याख्यया
टङ्कं कृष्णमृगं वरं च दधतं चक्रप्रदं तं भजे ॥

एकवक्त्रं त्रिनेत्रं च जटामकुटसंयुतम् ।
दधमेणं च परशुं वरं च चैव वामके ॥

दक्षिणे चक्रसंयुक्तं दातृरूपमिहोच्यते ।
देवस्य वामभागे तु श्यामरूपं सुसंस्थितम् ॥
सर्वाभरणसंयुक्तं पीतवस्त्रोत्तरीयकम् ।
शङ्खचक्रसमायुक्तमुत्तरे चाञ्जलिं न्यसेत् ॥
एवं लक्षणसंयुक्तं विष्णुरूपमिहोच्यते ।

(श्रीतत्वनिधौ ॥)

अथातस्संप्रवक्ष्यामि सर्वभूतहिताय च ।
चक्रदानस्वरूपं तु शृणु (ष्व) शरवणोद्भव ! ॥
त्रिनेत्रं चतुर्भुजं शान्तं जटामकुटमण्डितम् ।
वामपादं तु शयनं लम्बितं सव्यपादकम् ॥
टङ्कं रथाङ्गं सव्ये च वर(दं) कृष्णमृगं तथा ।
वामे विष्णुसमायुक्तं कृताञ्जलिपुटान्वितम् ॥
वामे गौरीसमायुक्तमुत्तरे परमेष्ठिनम् ।
सर्वावयवसंयुक्तं सर्वलक्षणसंयुतम् ॥
पद्मपुष्पं समभ्यर्च्य हरिणा नेत्रपूजितम् ।
प्रभामण्डलमध्यस्थं शिरश्चक्रसमायुतम् ॥
एवं कल्प्य विशेषेण प्रतिष्ठां शृणु षण्मुख ! ।

(उत्तरकारणागमे ॥)

नन्दीशानुग्रहः ।

नन्दीश्वरप्रसादे तु विशेषः कश्चिदिष्यते ।
द्विनेत्रं द्विभुजं शान्तं कृताञ्जलिपुटान्वितम् ॥

सुविकीर्णजटोपेतं जटामकुटकान्वितम् ।
आभङ्गसहितं कुर्य्यादागमश्रवणोन्मुखम् ॥

नन्दीश्वरप्रसन्नं तु कारयेत्पूर्वमानतः ।

(उत्तरकामिकागमे पञ्चपञ्चाशत्तमपटले ॥)

विघ्नेश्वरवरप्रसन्नमूर्तिः ।

चतुर्भुजं त्रिनेत्रं च जटामकुटसंयुतम् ।
अभयं शिरसि न्यस्य वरदं वामहस्तके ॥

कृष्णापरशुसंयुक्तं विघ्नेशो दक्षिणे स्थितः ।
शयानं दक्षिणं पादं दधं वामं तु लम्बितम् ॥

सर्वाभरणसंयुक्तं श्यामवर्णं सुशोभितम् ।
देवस्य वामपार्श्वे तु देवी प्रहसिताननाम् ॥

सर्वालङ्कारसंयुक्ता सव्ये तूत्पलधारिणीम् ।
वामे वरदसंयुक्ता द्विभुजां च त्रिनेत्रकाम् ॥

दक्षिणे शयितं पादं दधं वामे तु लम्बितम् ।
एकपीठस्थिता देवीमुमास्कन्दोक्तवत्कुरु ॥

विघ्नेशं रक्तवर्णं च किरीटमकुटान्वितम् ।
नमस्काराञ्जलिकरं पाशाङ्कुशसमन्वितम् ॥
सर्वलक्षणसंयुक्तं सर्वाभीष्टफलप्रदम् ।
विघ्नप्रसादमित्युक्तं................ ॥

(श्रीतत्त्वनिधौ ॥)

अथातस्संप्रवक्ष्यामि विघ्नेशानुग्रहं परम् ।
सर्वभूतहितं पुण्यं सर्वाभीष्टप्रदायकम् ॥
सर्वविघ्नविनाशार्थं कारयेद्देशिकोत्तमः ।
त्रिनेत्रं चतुर्भुजं शान्तं कुण्डलाभरणोज्ज्वलम् ॥
बकपुष्पसुकेशं च स्तबकं चूलिकाकृतिम् ।
बकपत्रसमायुक्तं बकपुष्पसमन्वितम् ॥
आरग्वधस्रजं चैव स्तबकेन परिप्लुतम् ।
अङ्कुशं त्वक्षमालां च भसितं वरदं तथा ॥
वामे गौरीसमायुक्तं सव्यभागे गजाननम् ।
गजाननस्य काले तु भसितं धार्यं पाणिना ॥
दिव्यच्छत्रसमायुक्तं सर्वावयवसुन्दरम् ।
एवं संकल्प्य विधिवत्प्रतिष्ठां कारयेत्ततः ॥

(उत्तरकारणागमे ॥)

किरातार्जुनमूर्तिः ।

चतुर्भुजं त्रिनेत्रं च जटामकुटसंयुतम् ।
सर्वाभरणसंयुक्तं दिव्याम्बरसमावृतम् ॥

धनुर्बाणयुतं रक्तं कृष्णापरशुसंयुतम् ।
उपवीतसमायुक्तं समभङ्गतनुं कुरु ॥

वामे गौरीसमायुक्तं दक्षिणे त्वर्जुनं स्थितम् ।

अर्जुनस्वरूपम् ।

एकवक्त्रं द्विनयनं जटामकुटसंयुतम् ।
सर्वाभरणसंयुक्तं कृताञ्जलिपुटं स्थितम् ॥

एवं किरातमाख्यातम्............ ।

(श्रीतत्वनिधौ ।।)

नृत्तमूर्तयः ।

नृत्तमूर्तयः ।

नृत्तमूर्तिः । (१)

नृत्तमष्टशतं भेदं तेष्वादौ नव उच्यते [1] ।
उत्तमं दशतालेन सर्वाङ्गं परिकल्पयेत् ॥

ऊर्ध्वकुक्षिं स्पृशेत्पूर्वसूत्रमेवं प्रकल्पयेत् ।
तत्सूत्राद्गोलबाह्वग्रमर्धाधिककलाङ्गुलम् ॥

तस्मादपरबाह्वग्रं युगाङ्गुलमुदाहृतम् ।
तस्मादग्निकराग्रान्तं साष्टत्रिंशाङ्गुलं तु वा ॥

हिक्कासूत्रसमोद्धृत्य तद्धस्ते मध्यमाग्रके ।
तद्धस्ततलमध्ये वा मध्याङ्गुलाग्रपर्वके ॥

मध्यपर्वेऽथवोद्धृत्य त्वनलं पात्रसंयुतम् ।
पात्रं विनाऽथवा त्वग्निं पञ्चांशं विस्तृतं भवेत् ॥

दक्षिणे पूर्वसूत्रात्तु बाह्वग्रं विंशदङ्गुलम् ।
तस्माड्डमरुके हस्ते मणिबन्धस्य बाह्यकम् ॥

---

[1] 'नृत्तमष्टदशं ह्येषां तेष्वादौ नवमुच्यते' इति पाठान्तरम् ।

अष्टविंशतिमात्रं वा त्रिंशदङ्गुलमेव वा ।
दक्षिणे पूर्वहस्तं तु अभयं परिकल्पयेत् ॥
तन्मध्यमाङ्गुलाग्रं तु हिक्कासूत्रसमोद्धृतम् ।
अभये प्रकोष्ठमध्ये भुजङ्गवलयं न्यसेत् ॥
प्रकोष्ठमध्यनाहस्य सपादं तस्य दैर्घ्यकम् ।
तद्दीर्घादुपरिख्यातं फणं भान्वङ्गुलं भवेत् ॥
सप्ताङ्गुलविशालं तु घनं चैकाङ्गुलं भवेत् ।
पुरस्स्थितान्सर्माक्ष्यं तु जिह्वाद्वयसमन्वितम् ॥
भुजङ्गवलयं ह्येवं कल्पयेत्कल्पवित्तमः ।
उद्धृताङ्गुस्तु जानूर्ध्वनाभिसूत्रसमं भवेत् ॥
सुविकीर्णजटाभारं पञ्चषं सप्त एव वा ।
रुद्रसङ्ख्याथवा विप्र ! उभयोः पार्श्वयोस्तथा ॥
जटाभारं पुष्पमाल्यैरलङ्कृत्य विशेषतः ।
नागं चैवार्कपुष्पं च दुर्धूर(धुस्तूर ?)कुसुमं तथा ॥
हसितशीर्षकं १ चैव करोटी रत्नबन्धितम् ।
भूषयित्वा तु मकुटं दक्षिणेऽर्धेन्दुशेखरम् ॥
सिन्दूरालङ्कृतोरस्कमक्षमालावलम्बितम् ।
भस्मोद्धूलितसर्वाङ्गं किंचित्प्रहसिताननम् ॥

---

१ 'हसति शिरसीक'मिति आदर्शान्तरपाठः ॥

यज्ञोपवीतसंयुक्तमुरस्सूत्रसमन्वितम् ।
व्याघ्रीचर्म्माम्बरोपेतमूरुत्रिंशावसानकम् ॥

पादौ नूपुरसंयुक्तौ सर्वाभरणभूषितः ।
हस्तपादाङ्गुलास्सर्वे रत्नहेमाङ्गुलीयकाः ॥

मध्याङ्गुला विवर्ज्यास्तु शेषास्तु मुद्रिकान्विताः ।
दक्षिणं कुञ्चितं पादमपस्मारोपरि स्थितम् ॥

तिर्य्यक्पादतलं न्यस्वा नृत्तं कुर्य्यान्महेश्वरः ।
वामपादेतोद्धृत्य[1] तिर्य्यक् तद्दक्षिणानुगम् ॥

डोलहस्तमथावर्त्ये त्वपस्मारमथोच्यते ।
शम्भोस्सव्ये शिरः स्थाप्य वामे पादौ विकीर्णकौ ॥

तन्मुखं तु समुद्धृत्य व्याललीलासमन्वितम् ।
व्यालं वै वामहस्ते तु दक्षिणं तस्य मुद्रया ॥

तस्य श्यामनिभाकारमपस्मारं द्विजोत्तम ! ।
तस्य पार्श्वेऽप्युमादेवीं प्रागुक्तविधिना कुरु ॥

इदं स्यात्प्रथमं नृत्तं सर्वलोकहितावहम् ।

(अंशुमद्भेदागमे पञ्चषष्टपटले ॥)

नृत्तमूर्तिप्रतिष्ठां तु वक्ष्ये तल्लक्षणान्विताम् ।
चतुर्भुजस्त्रिनेत्रश्च संविकीर्णजटायुतः ॥

---

[1] ' वामपादं ततोद्धृत्ये 'ति पाठान्तरम् ।

जटामकुटसंयुक्तो वक्रनागफणावृतः ।
पृष्ठगाः पार्श्वगास्तास्स्युः पञ्चाद्येकैकवृद्धितः ॥
त्रिंशत्सङ्ख्यावसानास्स्युर्जटास्तास्सान्तरालकाः ।
धुर्दूरा(धुस्तूरा ?)रग्वधार्कादिपुष्पयुक्तास्सपिङ्गलाः ॥
कृताञ्जलिपुटोपेतजाह्नव्या दक्षिणस्थया ।
बालचन्द्रेण संयुक्तो वामपार्श्वस्थितेन च ॥
युक्तो वकुलमालाभिर्मुक्तादामोरगादिभिः ।
व्याघ्राजिनाम्बरो दीप्तस्सर्वाभरणभूषितः ॥
वामदोर्मूलमालम्बिद्वीपिचर्माम्बरान्वितः ।
दिव्याम्बरान्वितो वापि मृगाजिनयुतोऽपि वा ॥
करस्थ[1]ब्रह्मकपालेन नानापुष्पैरलङ्कृतः ।
धृतवाराहत(द ?)न्ताम[2]इशार्दूलनखकच्छपः ॥
शाङ्खिकैर्मणिभिः प्रोतमालया हृदि भूषितः ।
स्थितो दक्षिणपादेन वामेनोपरिवर्तिना ॥
कुञ्चितावर्तमानाङ्घ्रिमुप्रसारितसत्करः ।
अम्बिकामुखविम्बाब्जभ्रमरीकृतलोचनः ॥
आबद्धकिङ्किणीयुक्तस्तद्वन्नूपुरशोभितः ।
वामदक्षिणकर्णाश्रयपत्रिकानककुण्डलः ॥

---

१ 'अपि माष'मिति न्यायेन करस्थेतिपदे रेफो निरस्त इति संभाव्यते ।
२ 'दंष्ट्राग्रः' इति पाठान्तरम् ।

दक्षाभयकरस्थेन भुजङ्गेनोत्फणेन च ।
वामापरकरस्थेन वह्निना दक्षकेन तु ॥
डिण्डिमेन समायुक्त उपवीतेन संयुतः ।
गोक्षीरधवलप्रख्य आदित्याङ्गुलभङ्गयुक् ॥
नानासर्पसमायुक्तस्त्वपस्मारोपरि स्थितः ।
मूर्ध्नो ललाटदक्षस्थं ना सादक्षपुटस्थितम् ॥
नाभेर्दक्षिणतो गुल्फमध्ये सूत्रं प्रसारयेत् ।
ललाटमध्यं सूत्रात्तु द्विमात्रमिति कीर्तितम् ॥
हिक्कासूत्रद्वयोर्मध्ये त्रिमात्रमिति कीर्तितम् ।
श्रोणिवामोरुसंस्पृष्टं तत्सूत्रमिह संमतम् ॥
सूत्रगुल्फद्वयोर्मध्यमेकाङ्गुलमिति स्मृतम् ।
सूत्राद्धि नतजान्वन्तं भानुदिङ्नन्दमात्रकम् ॥
तत्सूत्राद्वामपृष्ठान्तं सप्ताधिकदशाङ्गुलम् ।
तत्सूत्राद्वामजान्वेकचत्वारिंशदशाङ्गुलम् (?) ॥
सूत्राद्दक्षिणतः कुक्षिरष्टाङ्गुल उदाहृतः ।
सूत्रात्तु सव्यकुक्षिस्तु रव्यङ्गुल इति स्मृतम् ॥
ऊरोर्दक्षिणतस्सूत्रं सप्ताधिकदशाङ्गुलम् ।
सूत्रात्तद्वामभागे तु नवमात्रमुदाहृतम् ॥
सूत्रात्तु वामकण्ठस्तु पञ्चाङ्गुल उदाहृतः ।
सूत्रात्तु दक्षकण्ठे तद्भाग इत्यभिधीयते ॥

सूत्रात्तु वामबाह्वन्तं त्र्यङ्गुलक्षयसंयुतम् ।
अथवान्यप्रकारेण सूत्रपातोऽभिधीयते ॥
कनीनिकान्तं तन्मूर्ध्नः तद्वन्नासापुटान्ततः ।
नाभेश्च दक्षवामान्तं स्थिताङ्घ्रेर्गुल्फमध्यमम् ॥
स्पृष्ट्वा यत्पतितं सूत्रं मध्यसूत्रमुदाहृतम् ।
सूत्राद्वाममुखं पञ्च[मा*]त्रं कण्ठं त्रिमात्रकम् ॥
बाह्वन्ते तिथिमात्रं स्यान्नवमात्रं तु कक्षगम् ।
मध्योदरेऽष्टमात्रं स्यात् श्रोणी विश्वाङ्गुलेन च ॥
कटिस्तिथ्यङ्गुलेन स्यादन्यत्र षष्टिमात्रकः ।
नवमात्रं तदूरु स्यात्पार्ष्ण्यन्तं वेदतुङ्ग[क*]म् ॥
सप्ताङ्गुलं मुखं नेत्रं कण्ठस्स्याद्दसमात्रकम् ।
बाह्वन्ते तु त्रिमात्रं स्यात्कक्षान्ते विश्वमात्रकम् ॥
मुन्यङ्गुलं भवेत्कुक्षौ श्रोण्यां स्याद्युगमात्रकम् ।
कट्यां च वेदमात्रं स्याज्जानुरष्टाङ्गुलं भवेत् ॥
पादाग्रे मुखमात्रं स्यादेवं बुद्ध्वा समाचरेत् ।
स्थितजानुसमं विद्याद्वर्तिताङ्घ्रेस्समुच्छ्रयम् ॥
तत्पार्ष्णिजान्वोर्द्विमुखस्त्वन्तरं परिकीर्तितम् ।
श्रोणीसमुच्छ्रयं वामजानोरुद्धरणं मतम् ॥
तदूरुमध्यान्नाभेश्च अन्तरं नवमात्रकम् ।
तज्जानोर्दण्डहस्तस्य मणिबन्धान्तरं मनुः ॥

तस्मादभयहस्तस्य मणिबन्धो रसाङ्गुलः ।
तस्य चाङ्गुष्ठमूलान्तात्स्तनाक्षव्यन्तरं मतम् ॥
ततो(दो?)स्समं तलोच्चं स्यात्तद्वाह्वोर्मध्यमात्पुनः ।
सप्तादशाङ्गुलं विद्यादण्डहस्तस्य को(कू?)र्परम् ॥
भुजान्तं साग्निहस्तोच्चं सोग्निः पञ्चाङ्गुलोच्छ्रयः ।
विस्तारः कोलकस्तस्य शिखाभिस्तिसृभिर्युतः ॥
धृताडमरुको हस्तो कर्णोच्चादङ्गुलोऽधिकः ।
साग्नि डमरुकायामो भूतैस्तु मुखविस्तृतिः ॥
कोलको मध्यविस्तारः परितस्सूत्रयन्त्रितः ।
एकजिह्वासमायुक्तो गम्भीरध्वनिसंयुतः ॥
बाह्वास्तु मणिबन्धान्तं चतुस्त्रिंशत्तथापरम् ।
अपस्मारोच्छ्रयं भानुरुद्रनन्दाष्टमात्रकैः ॥
देवस्य वक्त्रमानेन स्यादपस्मारमानकम् ।
वक्त्रद्वयं समारभ्य पञ्चवक्त्रावसानकम् ॥
वक्त्रार्धमानवृद्ध्या तु सप्तमानमुदाहृतम् ।
चतुस्तालेन कर्तव्यमपस्मारो द्विजोत्तमाः! ॥
उष्णीषात्पादपर्यन्तं षडष्टांशं विभाजयेत् ।
उष्णीषात्केशपर्यन्तं कोलकं चेति कीर्तितम् ॥
केशान्ताद्धनुपर्यन्तमष्टभागमिति स्मृतम् ।
गलमर्धाङ्गुलं प्रोक्तमध्यर्धः कर्ण उच्यते ॥

षडङ्गुल इति प्रोक्तो हिक्कादिहृदयान्ततः ।
तथैव तस्मान्नाभ्यन्तं षडङ्गुलमिति स्मृतम् ॥
तस्मात्तु मेढ्रमूलान्तं कौशिकाङ्गुलमुच्यते ।
ऊर्वायामं तु सप्तांशं जानूत्सेधो द्विमात्रकः ॥
जङ्घायामस्तु सप्तांशः पादोत्सेधो द्विमात्रकः ।
द्विभुजश्च द्विनेत्रश्च ऊर्ध्ववक्त्रस्त्वधोमुखः ॥
व्यालं वै वामहस्ते तु तस्य मूर्धा तु दक्षिणे ।
आवृतालङ्कृता भङ्गी सव्यपार्श्वशिरोयुतः ॥
देवस्य वक्त्रमानेन जाह्नव्यायाम उच्यते ।
द्विभुजा च त्रि(द्वि?)नेत्रा च करण्डमकुटान्विता ॥
सर्वाभरणसंयुक्ता कृताञ्जलिपुटान्विता ।
ऊर्द्ध्वभागादधोभागं तोयाकारेण कारयेत् ॥
गङ्गादेव्यानया देवस्संयुक्तो वा विवर्जितः ।
प्रभावकाशं विस्तारो दशाधिकशताङ्गुलम् ॥
सप्तत्रिंशच्छतायामतद्दण्डो भागविस्तरः ।
एकाद्यदशपर्यन्तमात्रैरूनाधिकापि वा ॥
त्र्यङ्गुलादङ्गुलव्यो तु बालचन्द्रस्तु सप्तधा ।
तद्वशात्पार्श्वगां देवीं कल्पयेत्तद्विधानतः ॥
कुर्याद्भृङ्गीरटिं (भृङ्गिरिटिं?) वाथ भद्रकालीमथापि वा ।
भुजङ्गत्रास आख्यातो भुजङ्गललितस्ततः ॥

भुजङ्गत्रासवत्सर्वं विशेषः कश्चिदस्ति हि ।
उद्धृतस्य तलं कुर्यात्स्थितजानूर्ध्वतः क्रमात् ॥

द्विमात्रं वा त्रिमात्रं वा चतुर्मात्रमथापि वा ।
भुजङ्गललितः ख्यातस्तद्वैव इहोच्यते ॥

भुजङ्गत्रासवत्सर्वं विशेषस्तत्र चोच्यते ।
उद्धृतं दक्षिणं पादं वामपादं तु वा नयेत् ॥

स पादो देहमध्यस्थ ऊर्द्ध्वपादतलान्वितः ।
चतुर्भुजोऽष्टहस्तो वा नानादिव्यास्त्रभूषितः ॥

शिलादिद्रव्यमासाद्य कुर्य्यादेवं नटेश्वरम् ।

(उत्तरकामिकागमे षट्चत्वारिंशत्तमपटले ॥)

नृत्तार्थोद्धृतवामाङ्घ्रि जानु नाभिसमोत्थितम् ।
पादाङ्गुष्ठसमो जानु जान्वङ्गुष्ठसमोद्धृतम् ॥

प्रसार्य वामहस्तं च दण्डव दयोपरि ।
अभयं दक्षिणं हस्तं शेषं डमरुकान्वितम् ॥

कण्ठसीमान्तमुद्धृत्य यथाशोभं प्रकल्पयेत् ।
साग्निकं वामहस्तं तु बाहुसीमान्तमुद्धृतम् ॥

पादाधस्स्थमपस्मारं सर्पक्रीडासमन्वितम् ।
धुस्तूरकं करोटिं च गङ्गेन्दुबकपिञ्छकम् ॥

तिस्रः पञ्चजटास्सप्त प्रसार्य कुसुमोज्ज्वलाः ।
सव्ये त्वेवं तथा वामे दीप्ताग्निसदृशोज्ज्वलाः ॥
नृत्तरूपमिदं वत्स ! सर्वशान्त्यर्थमुच्यते ।

(सुप्रभेदागमे चतुस्त्रिंशत्तमपटले ॥)

नृत्तमष्टाशतविधं तत्रादौ नव कथ्यते ।
भानुरुद्रदशांशं वा तुङ्गं नृत्तनतं भवेत् ॥
हिक्कासमानमुन्नम्य दक्षहस्ताङ्गुलाग्रकम् ।
तद्धस्ततलमध्ये वा मध्यमाङ्गुलिकाग्रके ॥
तन्मध्यपर्वगं वाथ वह्निं पात्रगतं तु वा ।
पात्रं विनाथवा कुर्यादपरे डमरुं तथा ॥
दक्षिणे त्वन्यहस्ते स्यादभयं पूर्वमुक्तवत् ।
अभये प्रकोष्ठमध्ये तु भुजङ्गवलयं न्यसेत् ॥
डोलायमानं तद्वामहस्तं कुर्याद्यथोचितम् ।
स्थिताङ्घ्रिजानोर्वामाङ्घ्रिजानुर्नात्र कलाङ्गुलम् ॥
सुविकीर्य जटाभारं नानानागविचित्रितम् ।
करोटिकाभिर्दुर्दूर(धुस्तूर ?)कुसुमैश्च भुजङ्गमैः ॥
भूषितं मकुटं कुर्याद् दक्षिणेऽर्धेन्दुशेखरम् ।
सिन्दूरालङ्कृतोत्तंसमक्षमालावलम्बितम् ॥

भस्मधूलितसर्वाङ्गं किंचित्प्रहसिताननम् ।
यज्ञोपवीतादियुतं व्याघ्रचर्माम्बरान्वितम् ॥

दक्षिणं कुञ्चितं पादमपस्मारोपरि स्थितम् ।
चतुस्तालेन कर्तव्यमपस्मारं प्रमाणतः ॥

शम्भोस्सव्यगतं तस्य शिरः कुर्यादधोमुखम् ।
पादौ विकीर्ण्य(र्य ?) हस्ताभ्यां व्याललीलामुदान्वितम् ॥

व्यालं वै वामहस्ते वा दक्षिणं मुद्रयान्वितम् ।
सस्यश्यामानिभं कुर्यादपस्मारं विशेषतः ॥

पद्मपीठमधः कुर्यात्कलाङ्गुलसमुच्छ्रयम् ।
तच्चतुर्गुणविस्तारं प्रभामण्डलसंयुतम् ॥

रविमण्डलवृत्तं तु प्रभामण्डलमत्र तु ।
तत्र वामेऽप्युमादेवीं प्रागुक्तविधिना कुरु ॥

एतत्स्यात्प्रथमं नृत्तं सर्वलोकहितावहम् ।

(शिल्परत्ने द्वाविंशपटले ॥)

चतुर्भुजं त्रिनेत्रं च सुविकीर्णजटान्वितम् ।
कुररीवक्ष(?)संयुक्तं बर्हिपिञ्छसमन्वितम् ॥

मौलेर्दक्षे तु [१]धुर्तूरमर्धचन्द्रसमन्वितम् ।
दक्षिणे तु जटाग्रे तु जाह्नवीमभिवन्दिताम् ॥

---

१. धुत्तूरपदं धुर्तूर इति दुर्दूर इति च कारणाद्यागमेषु बहुत्र प्रयुज्यते ।

पत्रं तु वामकर्णे तु दक्षिणे नक्रकुण्डलम् ।
सर्वाभरणसंयुक्तमुपवीतसमन्वितम् ॥
व्याघ्राजिनाम्बरोपेतं पादकिङ्किणिशोभितम् ।
जगत्प्र(गजप्र?)सारितं वामे दक्षिणेऽभयहस्तकम् ॥
डमरुं सव्यहस्ते तु वह्निर्वै वामहस्तके ।
वक्रं तु दक्षिणं पादमपस्मारोपरि स्थितम् ॥
उद्धृतं वामपादं तु पादाग्रं दक्षिणानुगम् ।
ललाटमध्यं दक्षे तु हित्वा सार्धाष्टकं यवम् ॥
तस्मात्तु लम्बयेत्सूत्रं दक्षनासापुटान्तकात् ।
दक्षिणाङ्घ्रेस्तु गुल्फस्य मध्यमादेव पातितम् ॥
तत्सूत्रकक्षयोर्मध्ये ऊरुस्सप्तत्यङ्गुलं भवेत् ।
तत्सूत्रकक्षयोरन्तर्वामोरोर्वसुमात्रकम् ॥
तत्सूत्राद्दक्षिणे ग्रीवा षडङ्गुलमिति स्मृतम् ।
तत्सूत्राद्वामके ग्रीवा गुणाङ्गुलमुदाहृतम् ॥
तत्सूत्राद्दक्षिणे नाभेर्यन्तरं चाङ्गुलं भवेत् ।
तत्सूत्रान्मेढ्रमूलान्ताद्वामभागमिति स्मृतम् ॥
वामा स्फिक्पिण्डिका सूत्रात्समानामङ्गुलं भवेत् ।
तत्सूत्राद्दक्षपादस्य जानुकं तु दशाङ्गुलम् ॥
दक्षिणे बाहुसीमान्ताद्धिक्कासूत्रस्य मध्यमम् ।
(यवद्वयसमायुक्तं विंशदङ्गुलं चेति कीर्तितम् ॥)

यवद्वयाधिकं विंशदङ्गुलं चेति कीर्तितम् ।
हिक्कामध्यं समारभ्य दोस्सीमान्तं तु वामके ॥

यवद्वयसमायुक्तं सप्तादशाङ्गुलं भवेत् ।
नाभेर्दक्षिणके कुक्षितारं भागमिति स्मृतम् ॥

नाभेर्वामे तु कुक्षौ च तारं त्रयोदशाङ्गुलम् ।
वरदाग्निधरं हस्तं दोस्समं चेति कीर्तितम् ॥

शरमात्रं पावकोत्सेधं विस्तारं तु गुणाङ्गुलम् ।
त्रिशिखाभिस्समायुक्तं कल्पयेत्तलमध्यमे ॥

बाहोश्च मणिबन्धाच्च चतुस्त्रिंशदङ्गुलं भवेत् ।
डमरुकोपेतहस्तं तु सूचीहस्तमिति स्मृतम् ॥

तत्सूचिहस्तकस्योर्ध्वं कर्णोर्ध्वसममुच्यते ।
बाहोश्च मणिबन्धाच्च चतुर्विंशदङ्गुलं भवेत् ॥

वामाङ्घ्रेश्चैव जानूर्ध्वं नाभेस्तु सममुच्यते ।
वामाङ्घ्रेः पार्ष्णिकाधश्च वक्राङ्घ्रेर्जानुकोपरि ॥

तत्समं त्विति विज्ञेयं तत्पार्ष्णेर्जानुकान्ततः ।
चतुस्त्रिंशतिमात्रं तु ह्यन्तरं चेति कीर्तितम् ॥

मणिबन्धकजान्वोश्च ह्यन्तरं तु यवं भवेत् ।
दोर्मूलान्तसमं चैव अभयाग्रं प्रकीर्तितम् ॥

मणिबन्धकबाहोश्च ह्यन्तरं तु यमं भवेत् ।
तस्य कूर्परमध्ये तु व्यालं तत्रैव विन्यसेत् ॥

चूचुकं नाभिकामूला ब्यन्तरं[1] तु यमं(वं?)भवेत् ।
सव्यस्य वामसूत्रस्य मध्याद्वै पार्श्वयोस्तयोः ॥
वामबाहुद्वयोर्मध्ये शार्दूलाजिनकं न्यसेत् ।
त्रिवक्त्रायाममानेन अपस्मारं ततः कुरु ॥
चतुस्तालप्रमाणेन भूतरूपेण कारयेत् ।
तस्यैव वामपार्श्वे तु देवीं कुर्यात्सलक्षणम् ॥
भुजङ्गत्रासमेवं तु भिक्षाटनमथ शृणु ।

(पूर्वकारणागमे ॥)

नृत्तमूर्तिः । (२)

तदेव दक्षिणे पार्श्वे जटाग्रे जाह्नवी भवेत् ।
स्त्रीमानोक्ताङ्गसम्पूर्णं हृदयेऽञ्जलिसंयुतम् ॥
एवं जाह्नविसंयुक्तं नृत्तं यत्तद्द्वितीयकम् ।

(अंशुमद्भेदागमे पञ्चषष्टितमपटले ॥)

तदेव दक्षिणे पार्श्वे जटाग्रे जाह्नवी भवेत् ।
शम्भोरुच्चाङ्गुलेनैव षोडशाङ्गुलमुन्नतम् ॥
स्त्रीमानोक्ताङ्गसंपूर्णा हृदयेऽञ्जलिसंयुता ।
एवं जाह्नविसंयुक्तं नृत्तं यत्तद् द्वितीयकम् ॥

(शिल्परत्ने द्वाविंशपटले ॥)

---

1. चूचुकानाभिकामूलब्यन्तरमिति स्यात् ।

नृत्तमूर्तिः । (३)

तदेव वामपादं तु अपस्मारोपरि स्थितम् ।
उद्धृतं दक्षिणं पादं वामात्तुङ्गं प्रसारयेत् ॥
शेषं प्रागिव कर्तव्यं नृत्तं...तुस्तृतीयकम् ।

(अंशुमद्भेदागमे पञ्चषष्टितमपटले ॥)

नृत्तमूर्तिः । (४)

सुविकीर्णजटाभारं जटामकुटमण्डितम् ।
जटामकुट(मण्डल ?)संयुक्तं शेषं प्रथमनृत्तवत् ॥
चतुर्थं नृत्तमेतत्स्यात् सर्वप्राणिहितावहम् ।

(अंशुमद्भेदागमे पञ्चषष्टपटले ॥)

अनुकीर्णजटाभारं जटामकुटमण्डितम् ।
जटामण्डलयुक्तं वा चतुर्थेऽन्यद्यथादिमम् ॥

(शिल्परत्ने द्वाविंशपटले ॥)

नृत्तमूर्तिः । (५)

उष्णीषोर्ध्वकसीमान्तं सव्यपादं समुद्धृतम् ।
सुवक्रं वामपादं तु अपस्मारोपरि स्थितम् ॥
भुजाष्टकसमायुक्तमेतत्पञ्चममुच्यते ।
अभयं शूलपाशं च डमरुं दक्षिणे करे ॥

कपालं चाग्निपात्रं च घण्टां हस्तिकरोपमम् ।
गजहस्तोपमं हस्तं प्रसार्य्य दक्षिणानुगम् ॥

यत्तत्प्रथमनृत्तस्य पूर्वसूत्रं प्रसारयेत् ।
पञ्चमं नृत्तमेवं स्यात्ततष्षष्ठं वदाम्यहम् ॥

अंशुमद्भेदागमे पञ्चषष्टपटले ॥

उष्णीषोर्ध्वैकमात्रान्तं सव्यपादं समुद्धरेत् ।
सवक्रं वामपादं तदपस्मारोपरिस्थितम् ॥

(उप) भुजाष्टकसं [आ] युक्तमेतत्पञ्चममुच्यते ।
अभयं शूलपाशौ च डमरुं दक्षिणे करे ॥

कपालं चाग्निपात्रं च घण्टां[1] हस्तिकरोपमम् ।

(शिल्परत्ने द्वाविंशपटले ॥)

नृत्तमूर्तिः । (६)

दोर्भिष्षोडशभिर्युक्तं वामे गौरीसमायुतम् ।
स्कन्दभृग्वामहस्तेन सव्यहस्तोद्धृताञ्जलिः ॥

स्कन्दोभयकराभ्यां तु मातुस्तनकदाहृतम्[2] ।
एवं गौरी समीक्ष्येशं भीतातिस्नेहविस्मयात् ॥

---

१ 'तालिण्डुकरोपम 'मिति पाठान्तरम् ॥ २ 'हस्ताभ्यामुद्धृतं स्कंध स्तनं तस्य प्रसारितम्' इति पाठान्तरम् । 'निर्पाक्ष्य चे' ति शिल्परत्नगतापेन समनन्तरस्थितेन भवितव्यमिति प्रतिभाति ।

अभयं डमरुं चैव वज्रं शूलं तथैव च ।
पाशं टङ्कं तथा दण्डं नागं वै दक्षिणे करे ॥

अभयं शूलपाशं च खड्गं डमरुकं ध्वजम् ।
वेतालं सूचिहस्तं च दक्षिणेऽष्टकरं भवेत् ॥

सव्यानुगकरं डोलं वामं चैव गजोपमम् ।
अनलं मिथुनं चैव वलयं केतुरेव च ॥

घण्टा खेटकपालं च वामपार्श्वेऽष्टहस्तके ।
अनलं गजहस्तामं खेटकं विस्मयं तथा ॥

घण्टां चैव कपालं च क्षुरिका सूचिमेव च ।
वामे त्वष्टभुजं ख्यातं शेषं पञ्चमनृत्तवत् ॥

पादौ पंचमनृत्तं स्यात् यत्तत्तद्वद्विधीयते ।
षष्ठमं ह्येवमाख्यातं सप्तमं शृणु सुव्रत ! ॥

(अंशुमद्भेदागमे पञ्चषष्टितमपटले ॥)

दोर्भिष्षड्भिसंयुक्तं[1] वामे गौरीसमायुतम् ।
स्कन्दो भयात्कराभ्यां तु मातुः स्तनह्रदोदरात् ॥

निपीड्य वा कराभ्यां तु वामभागोद्धृताञ्जलिम् ।
एवं गौरी निरीक्ष्येशं भीत्यातिस्नेहविस्मयात् ॥

---

१ 'दोर्भिष्षोडशभिर्युक्त' मिति भवितव्यम् ।

अभयं डमरुं चैव वज्रं शूलं तथैव च ।
पाशं टङ्कं तथा दण्डं नागं वै दक्षिणे करे ॥

सजानुगकरं डोलं वामं गजकरोपमम् ।
अङ्कु(न?)लं मिथुनं चैव वलयं केतुरेव च ॥

घण्टां चैव कपालं च वामपार्श्वेऽष्टहस्तके ।
पादौ पञ्चमनृत्तस्य विधिवत्तद्विधीयते ॥

(शिल्परत्ने द्वाविंशपटले ॥)

नृत्तमूर्तिः । (७)

त्रिनेत्रं चाष्टहस्तं च मुक्तिकीर्णजटायुतम् ।
कुञ्चितं वामपादं तु अपस्मारोपरि स्थितम् ॥

उद्धृतं दक्षिणं पादं चाङ्गुष्ठं चाग्रसीमगम् ।
अभयं शूलपाशं च डमरुं दक्षिणे करे ॥

कपालं चाग्निपात्रं च तथा विस्मयहस्तकम् ।
गजहस्तोपमं हस्तं सव्यासव्यानुगं तथा ॥

नतमानं दशांशं स्यात् वामे गौरीसमायुतम् ।
सप्तमं नृत्तमाख्यातं जगदार्तिविनाशनम् ॥

(अंशुमद्भेदागमे पञ्चषष्टपटले ॥)

नृत्तमूर्तिः । (८)

तदेव षड्भुजोपेतमभयं डमरुं तथा ।
शूलं दक्षिणपार्श्वे तु कपालं विस्मयं तथा ॥
गजहस्तोपमं वामे सूत्रं प्राग्वत्तदष्टमम् ।
पञ्चमस्य च नृत्तस्य षष्ठमस्य च ... स्मृता ॥
नेत्रद्वयमिति ख्यातं शेषाणां तु त्रिनेत्रकम् ।

(अंशुमद्भेदागमे पञ्चषष्टपटले ॥)

नृत्तमूर्तिः । (९)

चतुर्भुजं त्रिनेत्रं च जटामकुटसंयुतम् ।
अभयं डमरुं सव्ये वामेऽग्निर्गजहस्तवत् ॥
अपस्मारं विना पीठे वामाङ्घ्रिं कुञ्चितं स्थितम् ।
तत्तत्पुरस्स्थितं पीठे सव्यपादकानिष्ठिका ॥
तत्पादं कुञ्चितं युक्त्या सूत्रं युक्त्या तु लम्बयेत् ।
नवमं नृत्तमाख्यातं गङ्गाधरमथ शृणु ॥

(अंशुमद्भेदागमे पञ्चषष्टपटले ॥)

दक्षिणामूर्तिभेदाः ।

दक्षिणामूर्तिभेदाः।

व्याख्यानदक्षिणामूर्तिः ।

अथ वक्ष्ये विशेषेण दक्षिणामूर्तिलक्षणम् ।
लम्बयेद्दक्षिणं पादं वामाङ्घ्रेर्नलकाग्रकम् ॥

सव्योर्वग्रे निधातव्यं वामपादं तु शाययेत् ।
नतमध्यर्धमात्रं स्याच्चतुर्भुजसमन्वितम् ॥

दक्षिणे पूर्वहस्तं तु ज्ञानमुद्रां तु धारयेत् ।
दक्षिणे परहस्तं तु अक्षमालाधरं परम् ॥

वरदं वामहस्तं स्याद्दण्डहस्तमथापि वा ।
वामजानूपरिष्टात्तु वरदे तलपृष्ठकम् ॥

वामजानूपरिष्टात्तु दण्डं चेत्कूर्परं न्यसेत् ।
वामे तु परहस्ते तु वह्निं वा व्यालमेव वा ॥

अर्धार्जवक्त्र[1] सर्वाङ्गमार्जवं स्फटिकोपमम् ।
विकीर्णमूर्धजं वापि जटामण्डलमेव वा ॥

---

१ 'अर्धार्जवक्त्र' मित्यर्धस्य 'अर्धेन्द्रवक्त्रसर्वाङ्गममदा स्फटिकोपमम्' इति पाठान्तरम् ।

......बद्धमूर्ध्नि वा जटामकुटमेव वा ।
चतुर्भुजस्त्रिनेत्रस्तु कुन्देन्दुधवलप्रभः ॥

श्वेतविद्रुमहेमाभश्श्यामाभो वा प्रकीर्तितः ।
व्याघ्रचर्माम्बरो वापि दिव्याम्बरधरस्तु वा ॥

उत्तरीयसमोपेतश्शुक्लयज्ञोपवीतकः ।
विकीर्णमूर्धजो वापि जटामकुट एव वा ॥

पट्टिकाबन्धनो वापि सत्करोटिकया युतः ।
धुर्धूरारग्वधैर्नागपत्रैश्चन्द्रेण मण्डितः ॥

पद्ममुद्रासमोपेतो गङ्गाकिङ्किणिसंयुतः ।
अधस्ताद्वटवृक्षस्य शैलादूर्ध्वं श्रितः पुनः ॥

व्याघ्रचर्मोपरिष्टात्तु स्थितो वीरासनोऽथवा ।
लम्बितं दक्षिणं पादं तज्जानूपरि संस्थितम् ॥

वामाङ्घ्रिनलकं कुर्यात्सव्यहस्तं तु मुद्रया ।
सन्दर्शसंज्ञयोपेतो वामहस्तस्थपुस्तकः ॥

अथवा नागसंयुक्तो वामहस्तस्समीरितः ।
वरदं तं विजानीयाज्जानुस्थमणिबन्धकः ॥

दण्डहस्तो यदा स स्यात्प्रकोष्ठं[१] जानुसंस्थितम् ।
विकसत्पद्मसङ्काशस्त्वधस्ताद्विस्तृताङ्गुलिः ॥

---

१ 'दण्डहस्ते यदा स स्याद्' इति पाठान्तरम् ।

परहस्तद्वये चाक्षमालाज्वालासमन्वितः ।
पद्मं वा चोत्पलं वापि व्यालं वामे तु कल्पयेत् ॥
कटकौ तौ प्रकर्तव्यौ प्रसन्नसमलोचनः ।
नासाग्रदृष्टियुग्वामहस्तो वा स्यात्सुपुस्तकः ॥
सजटामकुटा देवचूचुकास्यगलान्तकाः ।
तत्तत्कलासमोपेताश्शुक्लयज्ञोपवीतिनः ॥
शुक्लाद्यम्बरसंयुक्ता भस्मरुद्राक्षसंयुताः ।
कौशिकः काश्यपश्श्यामस्त्वितरौ पीतवर्णकौ ॥
रक्तवर्णो भरद्वाजो धूम्राभावत्रिगौतमौ ।
एषामेकद्वयं वापि त्रयं वा पार्श्वयोर्न्यसेत् ॥
व्याख्यानमूर्तिरेवं स्याद्गेयमूर्तिस्ततो मतः ।

(उत्तरकामिकागमे एकपञ्चाशत्तमपटले ॥)

दक्षिणामूर्तिमीशानं कुर्याद्वटतरोरधः ।
लम्बयेद्दक्षिणं पादं वामाङ्घ्रेर्नलकाग्रकम् ॥
सममेवं विधातव्यं वामपादं तु शाययेत् ।
दक्षिणे पूर्वहस्ते तु ज्ञानमुद्रां तु धारयेत् ॥
दक्षिणे परहस्ते तु कारयेदक्षमालिकाम् ।
वरदं वामहस्ते तु दण्डं वा परिकीर्तितम् ॥
वामजानूपरिष्टात्तु दण्डं चेत्कूर्परं न्यसेत् ।
वामे परकरे तत्र वह्निं वा मृगमेव वा ॥

विकीर्णमूर्धजं वापि जटामण्डलसंयुतम् ।
जटाभिर्बद्धमूर्तिर्वा जटामकुटशोभितम् ॥
शुद्धस्फटिकसङ्काशं............... ।
वामे धुर्द्दूर(धुस्तूर?)पुष्पं च नागं च शिरसि स्मृतम् ॥
दक्षिणेन्दुकलायुक्तं सर्वाभरणभूषितम् ।
सितवस्त्रोत्तरीयं च सितयज्ञोपवीतिनम् ॥
व्याघ्रचर्माम्बरोपेतं त्रिनेत्रं क्लेशवर्जितम् ।
रुद्राक्षं कण्ठमालां च ह्रन्मालां च विधापयेत् ॥
नारदो जमदग्निश्च वसिष्ठो दक्षपार्श्वके ।
भारद्वाजश्च शुनकस्त्वगस्त्यो वामपार्श्वके ॥
वन्दितैः किन्नराद्यैस्तु सेवितं भक्तिसंयुतैः ।
अपस्मारोपरिष्टात्तु लम्बपादतलं न्यसेत् ॥
धर्मव्याख्यानमूर्तिः स्यादेवं सर्वशुभावहम् ।

(शिल्परत्ने द्वाविंशपटले ॥)

दक्षेण मुद्रां प्रतिपादयन्तं सिताक्षसूत्रं च तथोर्ध्वभागे ।
वामे च पुस्तामखिलागमाद्यां बिभ्राणमूर्ध्वेन सुधाघरं च ॥
सिताम्बुजस्थं सितवर्णमीशं सिताम्बरालेपनमिन्दुमौलिम् ।
ज्ञानं मुनिभ्यः प्रतिपादयन्तं तं दक्षिणामूर्तिमुदाहरन्ति ॥

(विष्णुधर्मोत्तरे ॥)

चतुर्भुजं त्रिनेत्रं च द्वीपिचर्माम्बरान्वितम् ।
आवृतालङ्कृता भङ्गी शश्यर्ककुसुमान्वितम् ॥
सद(न्दं ?)शं दक्षिणं हस्तं पुस्तकं वामहस्तके ।
सव्यके चाक्षमालां च व्यालं वै वामहस्तके ॥
पादाग्रे दृष्टिपातं तु किंचिद्वक्त्रसमायुतम् ।
लम्बितं दक्षिणं पादं तस्योर्वग्रस्य चोपरि ॥
वामपादस्य नलकं संयुतं कारयेत्सुधीः ।
हिक्कामध्यं समारभ्य कटके मणिबन्धकात् ॥
अन्तरं त्रियवं प्रोक्तमृषिसङ्घैस्समावृतम् ।
अगस्त्यश्च पुलस्त्यश्च विश्वामित्रोऽङ्गिरास्तथा ॥
एवं व्याख्यानमूर्तिं तु गेयमूर्तिं शृणुष्वथ ।

(पूर्वकारणागमे एकादशपटले ॥)

ज्ञानदक्षिणामूर्तिः ।

तदेव वीणाहीनं तु ज्ञानमुद्राभयान्वितम् ।
वामं प्रसारितं हस्तं वामजानूरुकूर्परम् ॥
दक्षिणे त्वपरे चाक्षमाला वामेऽब्जमुत्पलम् ।
शुद्धश्वेतनिभं वर्णं शेषं पूर्ववदाचरेत् ॥
ज्ञानमूर्तिरिति ख्यातं सर्वकारणकारणम् ।

(अंशुमद्भेदागमे पञ्चसप्ततितमपटले ॥)

अथवा पूर्वहस्ताभ्यां ज्ञानमुद्राभयौ धृतौ ।
वामं प्रसारितं वाथ वामजानूर्ध्वकूर्परे ॥

अपरे दक्षिणे त्वक्षमालामुत्पलमन्यतः ।
ज्ञानमूर्तिरिति ख्यातं सर्वकारणकारणम् ॥

(शिल्परत्ने द्वाविंशपटले ॥)

योगदक्षिणामूर्तिः ।

अन्योन्याङ्घ्रितलं विप्र ! स्फिक्पिण्डाधः प्रकल्पयेत् ।
ज्ञानमुद्रां हृदि स्थाने त्वभ्यन्तरमुखं करम् ॥

वरदं वामहस्तं तु मेढ्रपीठोपरि न्यसेत् ।
अपरे दक्षिणे चाक्षमालाब्जं वामहस्तके ॥

नासाग्रं तु समीक्ष्याक्षमार्जवं सूत्रदेहकौ ।
अपरे तु जटालम्ब्य ऋषिभिस्सेवितं परम् ॥

योगमूर्तिरिति ख्यातं ध्याने दुःखनिवृत्तिदम् ।
लम्बयेद्दक्षिणं पादं वाममुत्कुटिका(त्कटुका ?)सनम् ॥

योगपट्टिकयाबध्य देहं चोत्कुटिका(त्कटुका !)ङ्घ्रिकम् ।
प्रसार्य्य वामहस्तं तु वामजानूपरि द्विज ! ॥

प्रागिवैव कृतं शेषं सोऽप्येवं योगमूर्ति वै ।
ऊरुमूर्ध्नि समाश्रित्य अन्योन्यं पादपार्ष्णिकौ ॥

योगपट्टिकयोपेतं जङ्घामध्ये द्विजोत्तम ! ।
प्रसार्य्य पूर्वहस्तौ द्वौ जानूपरि निधापितौ ॥

अपरे दक्षिणे चाक्षमाला वामे कमण्डलुम् ।
जटामण्डलसंयुक्तं ततश्चन्द्रशेखरम् ॥

नीलग्रीवासमायुक्तं शङ्खकुन्देन्दुसन्निभम् ।
अपरे शाययेद्वृक्षं नानासर्पविभूषितम् ॥

हृन्मा..................रुद्राक्षैस्तु[1] ।
एवं त्वनेकभेदेन दक्षिणामूर्तिरुच्यते ॥

(अंशुमद्भेदागमे पञ्चसप्ततितमपटले ॥)

व्याख्यानसहितस्त्वेव सन्दंशस्य समास्ययुक् ।
तत्राक्षिपातयोगेन सदाकुञ्चितलोचनः ॥

प्रसृतो वामहस्तस्स्याद्योगमूर्तिरयं मतः ।
अथ कुञ्चितवामाङ्घ्रियुग्मस्फिग्गतपार्ष्णिकः ॥

उद्धृतं तस्य जान्वग्रं दण्डकूर्परकान्तयुक् ।
सदंस(सन्दंश ?)दृष्टिपातश्च आभङ्गं चैव पूर्ववत् ॥

नानामृगैस्तु संकीर्णो नानाव्यालैस्तु संयुतः ।
नानामुनिगणैस्सार्धं सिद्धविद्याधरैरपि ॥

---

१ 'अपरेचाथये वृक्षो नानासर्पविभूषितः । हृन्माला कर्णमालाख्या देवन्द्रश्चे विराजितम् ॥' इति पाठान्तरम् ।

भूतैश्च किन्नरैरन्यैः पुष्पवृक्षैश्च मण्डितम् ।
शैलं कुर्यात्तु तत्पार्श्वे वटवृक्षस्तु शाद्वलः ॥

फलशाखोपशाखाढ्यो नानापक्षिसमायुतः ।
तन्मूले दक्षिणे छायानिषण्णः कृ(कृ?)पया युतः ॥

रत्नोपशोभिते पीठे व्याघ्रचर्मोत्तरच्छदे ।
आसीनो मुनिभिस्सम्यक् कौशिकादिभिरादरात् ॥

शिवद्विजकुलस्यादिभूतैस्तु परितस्स्थितैः ।
आगमाहितचेतोभिः परमेशेन दीक्षितैः ॥

एवं तु दक्षिणामूर्तेर्मूर्तिभेदा उदाहृताः ।
आसीनो वा स्थितो वापि ऋषिभिस्संवृतो न वा ॥

वटवृक्षविहीनो वा भूताद्यावृत एव वा ।
भूतस्थलम्बपादो वा दक्षिणेशस्समीरितः ॥

(उत्तरकामिकागमे एकपञ्चाशत्तमपटले ॥)

अन्योन्याङ्घ्रितलं सम्यक् स्फिक्पिण्डाधः प्रकल्पयेत् ।
ज्ञानमुद्रां हृदि स्थाने त्वभ्यन्तरमुखं करम् ॥

वरदं वामहस्तं तु मेढ्रपीठोपरि न्यसेत् ।
अपरे चोत्पलं चाक्षमालां पूर्ववदाचरेत् ॥

नासाग्रं स्वं समीक्ष्य स्वमार्जवं देहमाचरेत् ।
सुविकीर्णजटायुक्तं योगमूर्तिरिति स्मृतम् ॥

लम्बयेद्दक्षिणं पादं वाममुत्कुटि(त्कटु ?)कासनम् ।
संबध्य योगपट्टेन देहोत्कुटि(त्कटु ?)काङ्क्षिकौ ॥
प्रसार्य वामहस्तं तु वामजानूपरि स्थितम् ।
एतच्च योगमूर्तिस्स्याच्छेषं पूर्ववदाचरेत् ॥
ऊरुमूलं समाश्रित्य अन्योन्याबद्धपार्ष्णिकम् ।
योगपट्टिकयोपेतं जङ्घामध्ये विशेषतः ॥
प्रसार्य पूर्वहस्तौ द्वौ जानूपरि निधापितौ ।
अपरे दक्षिणे चाक्षमालां वाम(मे?)कमण्डलुम् ॥
जटामण्डलसंयुक्तं करोत्यर्धेन्दुशेखरम् ।
नीलग्रीवासमायुक्तं शङ्खकुन्देन्दुसन्निभम् ॥
योगमूर्तिविशेषाख्यं शेषं प्रागिव कारयेत् ।

(शिल्परत्ने द्वाविंशपटले ॥)

वीणाधरदक्षिणामूर्तिः ॥

तदेव वामपादेनोत्कुटि(त्कटु?)कासनसंयुतम् ।
पूर्वहस्तद्वयोर्वीणाधृतं युक्त्या द्विजोत्तम ! ॥
शेषं प्रागिव कर्तव्यमेतद्वीणाधरं भवेत् ।

(अंशुमद्भेदागमे पञ्चसप्ततितमपटले ॥)

ऊर्ध्वाधोमध्यकटकौ तस्या सर्पकरावुभौ ।
वीणा तु दक्षिणे वाग्रे(दक्षिणोर्वग्रे?)ऽदक्षिणे कटक(के?)स्थितः॥

दक्षिणे कटकं चोरुस्थितायां विनिवेशयेत् ।

(उत्तरकामिकागमे एकपञ्चाशत्तमपटले ॥)

तदेव वामपादेनोत्कुटिकासनसंयुतम् ।
पूर्वहस्तद्वये वीणा चेत्तद्वीणाधरं स्मृतम् ॥

(शिल्परत्ने द्वाविंशपटले ॥)

कटकं दक्षिणं हस्तमधोमुखं तदुच्यते ।
वामहस्तं तु कटकमूर्ध्ववक्त्रं तदुच्यते ॥
तन्त्रीं निवेशयेदूरुकाग्रे दक्षिणपादके ।
वामहस्तस्य कटके सव्यहस्तं तथोपरि ॥
ऊरुबाह्यं त्रिमात्रं तु कटकोर्ध्वे युगाङ्गुलम् ।
दण्डायाममिति प्रोक्तं विस्तारं तु द्विमात्रकम् ॥
वा(ला?)बुवक्त्रं तु षण्मात्रमुत्सेधं तु तदर्धकम् ।
एतदेव विशेषं तु शेषं पूर्वोक्तवद्भवेत् ॥
दक्षिणामूर्तिरेवं स्याच्छृणु मन्मथनिग्रहम् ।

(पूर्वकारणागमे एकादशपटले ॥)

कङ्कालमूर्तिभिक्षाटनमूर्ती ।

कङ्कालमूर्तिभिक्षाटनमूर्ती ।

कङ्कालमूर्तिः ।

अथ कङ्कालमूर्तेस्तु लक्षणं वक्ष्यतेऽधुना ।
पादौ तु पादुकोपेतौ वामपादं तु सुस्थितम् ॥

गमनापेक्षया सव्यपादमीषत्समुद्धृतम् ।
शुद्धश्वेतनिभं वर्णं सर्वाभरणभूषितम् ॥

रक्तकञ्चुकबद्धाङ्गं जटामकुटमण्डितम् ।
धुर्धूरपुष्पनागं च वामे सव्येन्दुशेखरम् ॥

हसितं वक्त्रसन्धार्य्य सुगेयगणसेवितम् ।
किंचित्प्रकाशितान्तस्स्थदशनांशुविलासितम् ॥

गेयशृङ्गारसंयुक्तमास्यमेवं प्रकल्पयेत् ।
कर्णौ कुण्डलसंयुक्तौ वामे शङ्खदलं तु वा ॥

पूर्वहस्तद्वयोर्वामे डंक(ढक्का?)कसव्ये प्रहारकम् ।
दक्षिणं हिमं वक्त्रव्यातं(हरिणीवक्त्रे व्यापितं?) सिंहकर्णवत् ॥

वामहस्ते तु पिञ्छं च कङ्कालास्थि च धारयेत् ।
तदस्थ्याकृति निर्मांसं द्विपादं द्विकरान्वितम् ॥

कृष्णश्यामानिभाकारमरे(मपाने?) दण्डवेशनम् ।
दण्डे कङ्कालपादौ द्वौ रज्जुना बन्धयेद्बुधः ॥
केतुकिङ्किणिनेत्राभ्यां निष्क्रान्तरुधिरं तु वा ।
एतत्कङ्कालनाम्ना तु वामस्कन्धोपरि न्यसेत् ॥
अनेकभूतैर्जायाभिस्सेवितं त्वादरान्वितैः ।
बलिपात्रधृतं भूतं वामेऽग्रे गमनान्वितम् ॥
दर्व्या त्वन्नं तु तत्पात्रे निधायाकृतिजायया ।
किञ्चित्प्रकाशितं योनिसंयुक्तानतवाससा ॥
संभ्रान्तमनसोपेता जायास्सर्वास्त्वनेकशः ।
व्याघ्रचर्माम्बरोपेतं दुकूलवसनान्वितम् ॥
दक्षिणे कटिपार्श्वे तु छुरिकां चैव बन्धयेत् ।
उभयोः पार्श्वयोर्हस्तं नानानागविभूषितम् ॥
ऋषिभिर्देवगन्धर्वसिद्धविद्याधरादिभिः ।
हृदयेऽञ्जलिसंयुक्तैस्संभ्रान्तमनसान्वितैः ॥
आत्मानीतस्वमानान्तं सेवितं तैः सुपूजितम् ।
वीधी(थी?)स्संमार्जयेद्वायुः पर्जन्यो जलसेचनम् ॥
पुष्पवृष्टिकृतो देवा ऋषयः स्तोत्रपाठकाः ।
ऋग्यजुस्सामाथर्वैश्च स्तुतिं कुर्यात्पदेपदे ॥
चर्मबन्धं च कंसं च कदम्बं सुषिरं तथा ।
श ध्वनिसमायुक्तं पञ्चशब्दा महारवे ॥

तुम्बुरुनारदादेश्च गेयकर्म सलक्षणम् ।
छत्रं धृत्वा रविश्चन्द्रश्चामरान्दिव्ययोषितः ॥

(अंशुमद्भेदागमे द्विसप्ततितमपटले ॥)

पादे पादुकसंयुक्तं चतुर्दोर्भिस्समन्वितम् ।
सयज्ञसूत्रं शान्तं च गमनोन्मुखमीश्वरम् ॥

आबद्धक्षुरिकं सौम्यं कपर्दमुकुटोज्वलम् ।
क्षौमाम्बरं सितं कुर्यात्सुन्दरं तं विभूषणम् ॥

सशङ्खपात्रिका वामे दक्षिणे नक्रकुण्डलम् ।
दक्षिणं कुञ्चितं पादं वामपादं तु सुस्थितम् ॥

समभङ्गयुतं वापि कान्तियुक्तनिजाङ्गकम् ।
प्रहरं दक्षिणे हस्ते ढक्कां वामे तु पूर्वयोः ॥

सव्यमध्याङ्गुलाग्रं तु कृष्णाजिह्वाग्रगं भवेत् ।
वामे करे परे पिञ्छदण्डकं कालदण्डकम् ॥

उभयोर्दण्डयोर्मूलं स्कन्धमूलोपरि स्थितम् ।
नानागणसमायुक्तं नानाभूतसमाकुलम् ॥

स्वसव्ये भूतमूर्धस्थबलिपात्रेण संयुतम् ।
नानारूपधरैर्भूतैरनेकैः परिवारितम् ॥

भेरिकाकाहळाद्याद्यैर्गानन्रृत्तरवाकुलैः ।
योषितश्चानवद्याङ्ग्यो मत्प्रेक्षावश्यमोहिताः ॥

न्यस्तभूषणवस्त्राद्या बलिदानसमुन्मुखाः ।
आशीर्वादान्विताः काश्चित् काश्चिदालिङ्गनोन्मुखाः ॥
योषितो देववक्षास्यस्तननाभ्यन्तरसीमकाः ।
(उत्तरकामिकागमे द्विपञ्चाशत्तमपटले ॥)

कङ्कालमूर्तिनं वक्ष्ये पादयोः पादुकान्वितम् ।
सुस्थितं वामपादं तु गमनापेक्षयापरम् ॥
पादमीषत्समुद्धृत्य करोत्वधिकसुन्दरम् ।
शुद्धश्वेतनिभं चारु सर्वाभरणभूषितम् ॥
रत्नकञ्चुकबद्धाङ्गं जटामकुटमण्डितम् ।
धुर्द्धूरपुष्पं नागं च वामे दक्षेन्दुशेखरम् ॥
किंचित्प्रकाशितान्तस्स्थदशनांशुविराजितम् ।
दक्षिणं हरिणीचक्रे व्यापितं सिंहकर्णवत् ॥
वामहस्ते च दण्डं तु कङ्कालास्थि च धारयेत् ।
तदस्यस्यातु(स्थ्याकृतिः) निर्मांसं द्विपादं द्विकरान्वितम् ॥
कृष्णश्यामनिभाकारमपाने दण्डवेशनम् ।
दण्डे कङ्कालपादौ द्वौ रज्जुना बन्धयेद्बुधः ॥
केतुदण्डेन नेत्राभ्यां निष्क्रान्तं रुधिरं तु वा ।
एवं कङ्कालदण्डं तु वामस्कन्धोपरि न्यसेत् ॥
बलिपात्रधृतं भूतं वामेऽग्रे गमनान्वितम् ।
दक्षिणेऽन्नं तु तत्पार्श्वे निधाय कृतजायया ॥

किंचित्प्रकाशितं योनिसंयुतानतवाससा ।
संभ्रान्तमनसोपेतं जायास्सर्वास्त्वनेकशः ॥
व्याघ्रचर्माम्बरोपेतं दुकूलवसनान्वितम् ।
दक्षिणे कटिपार्श्वे तु क्षुरिकाश्चैव बन्धयेत् ॥
क्षुरिका हैमसंकाशा रूपबंधसमन्विता ।
यक्षकिन्नरसिद्धाद्यैस्सेवितं पूजितं नुतम् ॥
चामरैरर्कचन्द्राभ्यां वीजितं रत्नभूषितैः ।
अण्डानां सुस्थितार्थं तु सर्वलोकोपकारकम् ॥
कङ्कालमोचनार्थं तु स्यात् कङ्कालाभिधः ।

(शिल्परत्ने द्वाविंशपटले ॥)

चतुर्भुजं त्रिनेत्रं च कपर्दमकुटान्वितम् ।
पादे पादुकसंयुक्तं किंचिद्वै गमनोन्मुखम् ॥
सर्वाभरणसंयुक्तं यज्ञसूत्रोपशोभितम् ।
शङ्खं तु वामकर्णे तु दक्षिणेन च कुण्डलम् ॥
क्षौमवस्त्रधरं कुर्याद्दक्षिणे क्षुरिकायुधम् ।
डमरुं वामहस्ते तु प्रहरं दक्षिणे करे ॥
कङ्कालदण्डमूलं तु पिञ्छदण्डस्य मूलकम् ।
वामे त्वपरहस्तेन सङ्गृहीतं तु कल्पयेत् ॥
उभयोर्दण्डकाग्रं तु अंसकोपरि विन्यसेत् ।
कृष्णामुखगतं हस्तं दक्षिणेऽपरहस्तकम् ॥

नानानागसमायुक्तं किंचित्प्रहासिताननम् ।
बलिपात्रधरं भूतदेवं वामे तु कारयेत् ॥

भिक्षादानोन्मुखस्त्रीभिर्मोहिताभिस्समाकुलम् ।
नानाभूतसमायुक्तं नानालीलासमन्वितम् ॥

ढक्कासंयुक्तहस्तं तु वरदं चेति कीर्तितम् ।
हरिणीजिह्वया हस्तस्याग्रमालेपितं कुरु ॥

कङ्कालधारिणं हस्तं कटकं चेति कीर्तितम् ।
कक्षतुल्यं तु तस्याग्रं यमं दोर्मणिबन्धयोः ॥

बिम्बस्य त्रिमुखं वापि सार्धत्रिमुखमेव वा ।
कारयेद्भूतरूपाणि पञ्चतालेन बुद्धिमान् ॥

देवस्तनसमोच्चं वा कक्षोच्चं वा विशेषतः ।
नारीस्संकल्पयेद्धीमानुभयोः पार्श्वयोरपि ॥

(पूर्वकारणागमे एकादशपटले ॥)

भिक्षाटनमूर्तिः ।

अथ वक्ष्ये विशेषेण भिक्षाटनमहेश्वरम् ।
पादौ पादुकसंयुक्तौ वामपादं तु सुस्थितम् ॥

ईषदुद्धृत्य सव्यं तु पादं तु गमनोत्सुकम् ।
ललाटमध्यमासव्ये नवाष्टौ वा यवान्तरे ॥

पादौ पादुकसंयुक्तौ पादुकारहितौ तु वा ।
सुविकीर्णजटाभारं जटामण्डलमेव वा ॥

वृत्तबन्धजटा वाथ नग्नरूपं नताननम् ।
ललाटपट्टसंयुक्तं करेधृत्वे(रोत्वर्धे ?)न्दुशेखरम् ॥

सर्वाभरणसंयुक्तं कटिसूत्रविवर्जितम् ।
शुद्धस्वेतनिभं वर्णं नानानागविभूषितम् ॥

दक्षिणे पूर्वहस्तं तु मृगस्यास्यान्तिकं भवेत् ।
वामे तु पूर्वहस्तं तु वरदं स्यात्कपालधृक् ॥

दक्षिणे परहस्ते च डमरुं च धरेद्विज ! ।
वामे तु शिखिपिञ्छं च कर्तव्यं त्वतिशीतलम् ॥

सितवस्त्रोत्तरीयं च नागेन कटिवेष्टितम् ।
श्वेतयज्ञोपवीतं तु नीलकण्ठं त्रिपुण्ड्रधृक् ॥

पद्मपीठोपरिष्टात्तु शेषं कङ्कालरूपवत् ।
(अंशुमद्भेदागमे चतुस्सप्ततितमपटले ॥)

एष एव परो देवो नग्नः कङ्कालवर्जितः ।
विकीर्णोभयपार्श्वस्थजटालकविभूषितः ॥

कटिदेशे प्रकर्तव्यः फणिसूत्रेण वेष्टितः ।
सत्कपालं च वरदं वामहस्तं तु कल्पयेत् ॥

दिव्यढक्कासमायुक्तं वामस्थमपरं करम् ।
शिखिपिञ्छधरं कुर्यात्सव्यस्थमपरं करम् ॥

व्यालपार्श्वस्थितः कार्यः पूर्वसव्यो मृगास्यगः ।
सव्यं कोणसमायुक्तमथवा परिकल्पयेत् ॥
कपालहस्तपृष्ठं तु नाभिदघ्नं प्रकल्पयेत् ।
डमरूच्चं तु कर्णान्तं तद्धस्तमणिबन्धनात् ॥
कर्णान्तं षोडशैर्मात्रैः शेषं कङ्कालवद्भवेत् ।
भिक्षाटनो हरः प्रोक्तः पृथग्विष्णुयुतो न वा ॥

(उत्तरकामिकागमे द्विपञ्चाशत्तमपटले ॥)

सृष्टिमूर्तेः कपालं तु स्थितिमूर्तेः कलेबरम् ।
डमरुकसमोपेतं भस्मसर्पैरलङ्कृतम् ॥
कण्ठे(स्कन्धे ?) शूलसमायुक्तं छन्नवीरसमायुतम् ।
पादुकोपरि पादौ च सर्वभूतसमावृतम् ॥
एवं भिक्षाटनं वत्स ! कामनाशमथ शृणु ।

(सुप्रभेदागमे चतुस्त्रिंशत्तमपटले ॥)

अथ भिक्षाटनं वक्ष्ये पादौ पादुकसंयुतौ ।
सुस्थितं वामपादं तु गन्तुं दक्षिणमुद्धृतम् ॥
सुविकीर्णजटाभारं जटामण्डलमेव वा ।
विवृथ(वृत्त ?)बन्धजटा वाथ उपानरहितं तु वा ॥
ललाटपट्टसंयुक्तं करोत्कर्षेन्दुशेखरम् ।
सर्वाभरणसंयुक्तं को(क ?)टिसूत्रविवर्जितम् ॥

शुद्धश्वेतनिभं प्रोक्तं नानानागविभूषितम् ।
दक्षिणं पूर्वहस्तं तु मृगस्यास्यान्तिकं भवेत् ॥

वामे तु पूर्वहस्तं तु वरदं तु कपालधृक् ।
दक्षिणे परहस्ते तु डमरुं चर्म्मघटितम् ॥

वामे तु शिखिपिञ्छं तु सितवस्त्रोत्तरीयकम् ।
श्वेतयज्ञोपवीतं तु कटौ नागेन वेष्टितम् ॥

नीलकण्ठं त्रिपुण्ड्राढ्यं पद्मपीठोपरि स्थितम् ।
कङ्कालमूर्तिवच्छेषं सर्वमत्र विशेषतः ॥

(शिल्परत्ने द्वाविंशपटले ॥)

त्रिनेत्रं चतुर्भुजं नग्नरूपं किंचित्स्मिताननम् ।
आवृतालङ्कृताभङ्गी पादे पादुकसंयुतम् ॥

दक्षिणे तु कराग्रं तु हरिणास्यानुगं भवेत् ।
दक्षिणापरहस्तं तु डमरुकयुतं भवेत् ॥

वामे कपालहस्तं तु अपरं पिञ्छधारिणम् ।
कुञ्चितं दक्षिणं पादं वामपादं तु स्वास्तिकम् (सुस्थितम्?) ॥

सभङ्गस्थानकं कुर्याद् गमनोन्मुखरूपकम् ।
कपालोपेतहस्तस्य पृष्ठं नाभिसमं भवेत् ॥

शेषं सर्वं विशेषेण कङ्कालस्योक्तवद्भवेत् ।

(कारणागमे एकादशपटले ॥)

गङ्गाधरादिमूर्तयः ।

गङ्गाधरादिमूर्तयः ।

गङ्गाधरः ।

गङ्गाधरमहं वक्ष्ये संक्षेपाच्छृणु सुव्रत ! ।
सुस्थितं दक्षिणं पादं वामपादं तु कुञ्चितम् ॥

दक्षिणे पूर्वहस्तं तु वरं देव्याननाश्रितम् ।
वामे तु पूर्वहस्तेन देवीमालिङ्गनं कुरु ॥

दक्षिणे परहस्तं तु जटाजाह्नविसंयुतम् ।
उष्णीषान्तं समद्धृत्य वामे कृष्णमृगं धृतम् ॥

देवस्य वामपार्श्वे तु गौरी विरहितानना ।
सुस्थितं वामपादं तु कुञ्चितं दक्षिणं भवेत् ॥

प्रसार्य दक्षिणं हस्तं वामहस्तं तु पुष्पधृक् ।
अथवा दक्षिणं हस्तं प्रकोष्ठं तिर्य्यगन्तं भवेत् ॥

श्रोण्यधस्तात्तलं लम्ब्य वस्त्रं धृतमिवाकृतिः ।
भागीरथीं दक्षपार्श्वे ऋषिभिः प्रार्थितेश्वरम् ॥

गङ्गाधराकृतिर्ध्येवं ततो वै त्रिपुरान्तकम् ।

(अंशुमद्भेदागमे षट्षष्टपटले ॥)

गङ्गाधरप्रतिष्ठां तु वक्ष्ये तल्लक्षणान्विताम् ।
चतुर्भुजस्त्रिनेत्रश्च जटामकुटमण्डितः ॥
दक्षिणाभयहस्तस्थोऽप्यन्यत्र कटकामुखः ।
तेन हस्तेन धृत्वैकां जटां गङ्गासमन्विताम् ॥
संस्थितस्तु प्रसन्नात्मा कृष्णापरशुसंयुतः ।
जटायुक्तकरोच्चं तु कर्णस्योर्ध्वसमं भवेत् ॥
तदन्तरं तु द्विमुखमाभङ्गेन समन्वितम् ।
इन्दुशेखरवच्छेषं कर्तव्यं मुनिपुङ्गवाः ! ॥
देवस्य वामभागे तु देवीं कुर्यात्सलक्षणाम् ।
कुर्याद् भगीरथं देवं नाभ्यास्थस्यन(स्यस्तन!)सीमगम् ॥
गलान्तं वाष्टतालेन विलम्बितजटान्वितम् ।
वल्कलाम्बरसंयुक्तं हृन्मस्तककृताञ्जलिम् ॥
द्विनेत्रं च द्विबाहुं तमेवं गङ्गाधरो भवेत् ।

(उत्तरकामिकागमे त्रिषष्टितमपटले ॥)

गङ्गाधरमहं वक्ष्ये सर्वलोकसुखावहम् ।
सुस्थितं दक्षिणं पादं वामपादं तु कुञ्चितम् ॥
विक्षिप्य स्याज्जटाबन्धं वामे त्रीपन्नताननम् ।
दक्षिणे पूर्वहस्तं तु वरदं दक्षिणेन(वामेन!) तु ॥

देवीमुपाश्रितेनैव देवीमालिङ्ग्य कारयेत् ।
दक्षिणापरहस्तेनोद्धृत्योष्णीषसीमकम् ॥
स्पृशेज्जटागतां गङ्गां वामेन मृगमुद्धरेत् ।
देवस्य वामपार्श्वे तु देवी विरहिताननी ॥
सुस्थितं वामपादं तु कुञ्चितं दक्षिणं भवेत् ।
प्रसार्य दक्षिणं हस्तं वामहस्तं तु पुष्पधृक् ॥
सर्वाभरणसंयुक्तौ सर्वालङ्कारसंयुतौ ।
भगीरथं दक्षिणे तु पार्श्वे मुनिवरान्वितम् ॥

(शिल्परत्ने द्वाविंशपटले ॥)

चतुर्भुजं त्रिनेत्रं च कपर्दमकुटान्वितम् ।
अभयं दक्षिणं हस्तं कटकं वामहस्तकम् ॥
कपर्दमकुटं तेन गृहीतं जाह्नवीयुतम् ।
वामदक्षिणहस्तौ तु कृष्णापरशुसंयुतम् ॥
अभयं पूर्ववत्प्रोक्तं कपर्दोपितहस्तकम् ।
तस्य वामे भवानीं तु कारयेल्लक्षणान्विताम् ॥
जान्वन्तं वापि नाभ्यन्तं भागीरथ्यास्तु मानकम् ।
प्रलम्बकजटोपेतमुष्णीषं जल(मुष्णीषाञ्जलि ?)हस्तकम् ॥
द्विभुजं च त्रिनेत्रं च वल्कलाम्बरसंयुतम् ।
एवं गङ्गाधरं प्रोक्तं चण्डेशानुग्रहं शृणु ॥

(पूर्वकारणागमे एकादशपटले ॥)

अर्धनारीश्वरः ।

अथार्धनारीमूर्तिं तु वक्ष्येऽहं शृणु सुव्रत ! ।
चतुर्भुजं वा द्विभुजं द्विविधं परिकीर्त्तितम् ॥

सुस्थितं दक्षिणं पादमितरं कुञ्चितं भवेत् ।
वामेऽर्धे पार्वतीरूपं दक्षिणेऽर्धे महेश्वरम् ॥

अभयं परशुं सव्यहस्तौ तत्तु शिवांशकम् ।
वृषमूर्ध्नि च विन्यस्तं कूर्परं वामहस्तके ॥

तदन्यद्वामहस्तं तु कटकं पुष्पहस्तकम् ।
द्विभुजे वरदं पूर्वं परहस्तं तु पुष्पधृक् ॥

शिवस्याभरणं सव्ये वामे स्त्रीभूषणं मतम् ।
पुंस्तनं दक्षिणे पार्श्वे वामे नारीपयोधरम् ॥

अथवा कुञ्चितं सव्यं वामपादं तु सुस्थितम् ।
सव्यं शूलधरं हस्तं वामं पुष्पधरं करम् ॥

वरदं दक्षिणं हस्तं वृषमूर्ध्नि तु कूर्परम्[१] ।
कपालं दक्षिणे हस्ते वामहस्तं प्रसारितम् ॥

दक्षिणे रौद्रदृष्टिस्स्यात् वामपार्श्वे तु शीतलम् ।
दुकूलं चोरुमध्यस्थं सव्यं गुल्फमन्यकम्[२] ॥

---

१ 'वरदं दक्षिणं हस्तमन्योऽक्षिशिरपूर्वक' मिति पाठान्तरम् ।
२ 'सव्यं गुल्फान्तमन्यक' मिति पाठान्तरम् ।

एवं समासतः प्रोक्तमर्धनारीश्वरं परम् ।

(अंशुमद्भेदागमे एकोनसप्ततितमपटले ॥)

उमार्धं वामभागं तु हरार्धं दक्षिणं वपुः ।
सजटामकुटं दक्षं शश्यर्धाङ्कितमग्रजाः ! ॥

करण्डमकुटं वाममलकेन समन्वितम् ।
ललाटं दक्षिणे भागे नयनार्धेन संयुतम् ॥

पत्रं तु वामकर्णे स्याद्वालिकेनापि संयुतम् ।
सनक्रकुण्डलं सव्ये तं विना वाथ कारयेत् ॥

सव्ये टङ्काभये हस्ते उत्पलं वामगे करे ।
देव्यध्यायोदितास्त्रं वा दर्पणासक्तलोचनम् ॥

उमाभागं स्तनोपेतं चित्रवस्त्रपरिच्छदम् ।
व्याघ्राजिनाम्बरं सव्यपादं कुञ्चितमिष्यते ॥

सुस्थितं वामचरणं नूपुरेणाप्यलङ्कृतम् ।
वामं मरतकाभं स्याद्दक्षिणं मणिसन्निभम् ॥

चन्द्रशेखरवच्छेषं कर्तव्यं हि मुनीश्वराः ।

(उत्तरकामिकागमे षष्टितमपटले ॥)

दक्षिणार्धे हरं चैव वामार्धे पार्वती तथा ।
दक्षिणं कुञ्चितं पादं वामपादमृजु स्थितम् ॥

हरस्य दक्षिणे हस्ते कूर्परं वृषके स्थितम् ।
प्रकोष्ठे शुकसंयुक्तं हरं परशुसंयुतम् ॥

वामे कटकहस्तं तु दक्षिणे त्वभयं स्मृतम् ।
श्यामवर्णमुखां देवीं रक्तवर्णं हरं तथा ॥

व्याघ्रचर्माम्बरं देवं पार्वतीं क्षौमधारिणीम् ।

(सुप्रभेदागमे चतुस्त्रिंशत्तमपटले ॥)

अर्धनारीश्वरं वक्ष्ये सुस्थितं दक्षिणाङ्घ्रिकम् ।
कुञ्चितं वामपादं तु सर्वाभरणभूषितम् ॥

वामार्धं पार्वतीरूपं दक्षिणार्धं महेश्वरम् ।
अभयं परशुं दक्षहस्ते वामगतं भुजम् ॥

वृषस्य मूर्ध्नि विन्यस्तकूर्परं चारु सुन्दरम् ।
पुष्पभृत्कटकं त्वन्यं चतुर्भुजमिदं स्मृतम् ॥

(शिल्परत्ने द्वाविंशपटले ॥)

अर्धनारीश्वरो देवः कथ्यते लक्षणान्वितः ।
दक्षिणं पुरुषाकारं वामं योषिन्मयं वपुः ॥

त्रिशूलं दक्षिणे हस्ते वामहस्ते च दर्पणम् ।
उत्पलं वा प्रकुर्वीत केयूरवलयान्विते ॥

कर्णे तु दक्षिणे नागं वामे कर्णे तु कुण्डलम् ।
जटाभारो दक्षिणे स्यादर्धचन्द्रार्धभूषितः ॥

कुन्तलान् कबरीभारान्वामभागेन विन्यसेत् ।
ललाटे लोचनस्यार्धं तिलकार्धं प्रकल्पयेत् ॥

विशालं दक्षिणं वक्षो वामं पीनपयोधरम् ।
द्वीपिचर्मपरीधानं दक्षिणं जघनस्थलम् ॥
वामे लम्बपरिधानं कटिसूत्रत्रयान्वितम् ।
वामस्य दक्षिणं पादं पद्मस्योपरि कल्पयेत् ॥
तस्यार्धे च तथा वामं नूपुरालङ्कृतं लिखेत् ।
(शिल्परत्नसंयोजिते कस्मिंश्चिद् ग्रन्थे ॥)

अर्धं देवस्य नारी तु कर्तव्या शुभलक्षणा ।
अर्धं तु पुरुषः कार्यस्सर्वलक्षणभूषितः ॥
ईश्वरार्धे जटाजूटं कर्तव्यं चन्द्रभूषितम् ।
उमार्धे तिलकं कुर्यात् सीमन्तमलकं तथा ॥
भस्मोद्धूलितमर्धं तु अर्धं कुङ्कुमभूषितम् ।
नागोपवीतिनं चार्धमर्धं हारविभूषितम् ॥
वामार्धे तु स्तनं कुर्यात् घनं पीनं सुवर्तुलम् ।
उमार्धे तु प्रकर्तव्यं सुवस्त्रेण च वेष्टितम् ॥
मेखलां दापयेत्तत्र वज्रवैदूर्यभूषिताम् ।
ऊर्ध्वलिङ्गं महेशार्धं सर्पमेखलमण्डितम् ॥
पादं च देवदेवस्य समपद्मोपरि स्थितम् ।
सालक्तकं स्मृतं वाममञ्जनेन(म्मञ्जीरेण?) विभूषितम् ॥

त्रिशूलमक्षसूत्रं च भुजयोस्सव्ययोस्स्मृतम् ।
दर्पणं चोत्पलं कार्यं भुजयोरपसव्ययोः ॥

(विष्णुधर्मोत्तरे ॥)

सबालेन्दुजटाभारमैशमर्धं तु दक्षिणम् ।
उमार्धं वामभागे तु सीमन्ततिलकालकम् ॥

नयनार्धं ललाटे तु संयुक्तं दक्षिणांशके ।
दक्षिणे कुण्डलं कर्णे वामकर्णे तु पत्रकम् ॥

कुटिलं पालिकां वामे टङ्काभयौ च दक्षिणे ।
उत्पलं वामहस्ते तु केयूरकटकान्वितम् ॥

उमांशे तु स्तनं कुर्यात् बह(बद्धा?)कारधरं तु वा ।
श्रोण्यर्धं दक्षिणे शम्भोर्व्याघ्रचर्मकृताम्बरम् ॥

उमार्धं कटिसूत्रान्तं चित्रवस्त्रपरिच्छदम् ।
नूपुरालङ्कृतं वामे सव्यपादं तु कुञ्चितम् ॥

आभङ्गेन तथा कुर्यात्सार्धनारीश्वरं वपुः ।

(पूर्वकारणागमे एकादशपटले ॥)

हर्यर्धमूर्तिः ॥

अर्धनारीश्वरो ह्येवं हर्यर्धं शृणुत द्विजाः ! ।
प्राग्वत्कृत्वा महेशार्धं विष्ण्वर्धमितरत्र च ॥

भुजद्वययुतं शङ्खकटकस्तत्र संमतः ।
पीताम्बरसमोपेतं सर्वाभरणसंयुतम् ॥

हर्यर्धमेवं ब्रह्मादिभागं चैवं समाचरेत् ।
(उत्तरकामिकागमे षष्टितमपटले ॥

पीताम्बरधरं विष्णुं व्याघ्रचर्माम्बरं हरम् ।
विष्णुं किरीटसंयुक्तं शङ्करं तु जटान्वितम् ॥

श्यामवर्णं हरिं चैव शङ्करं युक्तरूपिणम् ।
हरिरर्धमिदं प्रोक्तं भिक्षाटनमतः परम् ॥
(सुप्रभेदागमे चतुस्त्रिंशत्तमपटले ॥)

अथ वक्ष्ये हरिहरं सुस्थितं समपादकम् ।
दक्षिणे त्वभयं वामे कटकं नूरुसंयुतम् ॥

परशुं दक्षिणे वामे शङ्खं तु परहस्तके ।
वाममर्धं हरिं कुर्याद्धरमन्यार्धमाचरेत् ॥

क्रमाच्छ्यामप्रवालाभमुभयोचितभूषणम् ।
दक्षिणे व्युग्रदृष्टिस्स्याद्वामे शीतलनेत्रकम् ॥

किञ्चित्प्रकाशितोर्ध्वाक्षं दक्षिणार्धे ललाटके ।
शिरश्चक्रसमायुक्तं तस्य लक्षणमुच्यते ॥

द्व्यङ्गुलविशालं तु तद्वानांशे गतं नम् (!) ।
सुवृत्तं चक्रवत्तत्तु पद्माकृतिरथापि वा ॥

शिरश्चक्रविशालस्य सप्तभागैकभागिकम् ।
शिरश्चक्रस्य नालस्य विस्तारं परिकीर्तितम् ॥

चक्रतारत्रिभागैकं चक्रादाशिरसोऽन्तरम् ।
अग्राल्ललाटपट्टस्य शिरश्चक्रस्य नालकम् ॥

गुणाङ्के तु कण्ठ्यूर्ध्वे चक्रनालस्थितिर्भवेत् ।
चक्राद् गुणांशमालम्ब्य पुष्पमाला तु मध्यमात् ॥

सर्वेषामपि देवानां देवीनामेवमाचरेत् ।

(शिल्परत्ने द्वाविंशपटले ॥)

देवं हरिहरं वक्ष्ये सर्वपातकनाशनम् ।
दक्षिणे शङ्करस्यार्धमर्धं विष्णोश्च वामतः ॥

बालेन्दुभूषितः कार्यो जटाभारस्तु दक्षिणे ।
नानारत्नमयं दिव्यं किरीटं वामभागतः ॥

दक्षिणं सर्पराजेन भूषितं कर्णमालिखेत् ।
मकराकारकं दिव्यं कुण्डलं वामकर्णतः ॥

वरदो दक्षिणो हस्तो द्वितीयश्शूलभृत्तदा ।
कर्तव्यौ वामभागे तु शङ्खचक्रगदाधरौ ॥

दक्षिणे वसनं कार्यं द्वीपिचर्ममयं शुभम् ।
पीताम्बरमयं भव्यं जघनं सव्यमालिखेत् ॥

वामपादः प्रकर्तव्यो नानारत्नविभूषितः ।
दक्षिणाङ्घ्रिः प्रकर्तव्यो भुजगेन्द्रविभूषितः ॥

प्रतिमालक्षणानि ।

शीतांशुधवलः कार्यश्शिवभागो विचक्षणैः ।
अतसीपुष्पसंकाशो विष्णोर्भागो विरच्यते ॥

(शिल्परत्नसंयोजिते कस्मिंश्चिद् ग्रन्थे ॥)

कार्यं हरिहरस्यापि दक्षिणार्धे सदाशिवः ।
वाममर्धे हृषीकेशश्श्वेतनीलाकृतिः क्रमात् ॥
वरत्रिशूलचक्राब्जधारिणो बाहवः क्रमात् ।
दक्षिणे वृषभः पार्श्वे वामभागे विहङ्गराट् ॥

(विष्णुधर्मोत्तरे ॥)

ईशार्धं पूर्ववत्प्रोक्तं विष्ण्वर्धे मकुटं नयेत् ।
वामे तु द्विभुजोपेतं केयूरकटकोज्ज्वलम् ॥
स्यान्नक्रकुण्डलं कर्णे कटकं शङ्खहस्तकम् ।
अर्धपीताम्बरोपेतं भूषणैर्भूषणार्हकैः ॥
अञ्ज्यागतं तथा सर्वं चन्द्रशेखरवत्कुरु ।
हरिरर्धमिदं प्रोक्तं सुखासनमथ शृणु ॥

(पूर्वकारणागमे एकादशपटले ॥)

कल्याणसुन्दरः ।

अथ वक्ष्ये विशेषेण कल्याणसुन्दरं ततः ।
सुस्थितं वामपादं तु दक्षिणं कुञ्चितं भवेत् ॥

दक्षिणं पूर्वहस्तं तु गौरीदक्षिणहस्तभृक् ।
वरदं वामहस्तं तु परहस्तद्वयोस्ततः ॥

दक्षिणे परशुं वामे धृतं कृष्णमृगं परम् ।
जटामकुटसंयुक्तं सर्वाभरणभूषितम् ॥

देहं प्रवालवर्णाभं देवेशस्य विशेषतः ।
सव्ये श्यामनिभा देवी प्राग्वन्मानादिसंयुता ॥

उत्पलं वामहस्ते तु धृतं दक्षिणहस्तकम् ।
शम्भोर्हस्तेन संग्राह्यं लज्जालम्बाननान्विता ॥

पार्वत्यनुगता श्रीर्भूस्सर्वाभरणभूषिते ।
हस्ताभ्यां संस्पृशेदेते गौर्यायास्तु कटी द्विज ! ॥

देवाग्रे कारयेत्कुण्डे होमकर्म प्रजापतिः ।
शम्भोर्वै स्तनसीमान्तं प्रजेशस्योदयं भवेत् ॥

चतुर्भुजं चतुर्वक्त्रं सर्वाभरणभूषितम् ।
कुण्डिका चाक्षमाला च वामदक्षिणतः परे ॥

स्रुक्स्रुवौ पूर्वहस्तौ द्वौ धृतौ वामेतरौ क्रमात् ।
उत्तराभिमुखासीनः पद्मपीठे प्रजापतिः ॥

प्रागग्रौ देवदेवेशौ देवी देवस्य दक्षिणे ।
दक्षिणाभिमुखो विष्णुर्होमस्योत्तरतस्स्थितः ॥

शम्भोर्वै नासिसीमान्तं श्रेष्ठं अ......स्तनान्तकम्[१] ।
श्यामवर्णं समभङ्गं शङ्खचक्रं परे करे ॥
हिरण्यकरकेणापः पूर्वहस्तद्वयोरपि ।
सङ्गृह्य वरदे हस्ते दद्यादुकपूर्वकम् ॥
अनादिगोत्रसम्भूतस्य शिवः परमेश्वरः ।
आदिगोत्रामिमां गौरीं तवैवास्माद्ददाम्यहम् ॥
इत्युक्त्वा वरदे हस्ते दद्याद्वक्त्योदकं हरिः ।
अष्टविद्येशलोकेशास्सिद्धयक्षगणादयः ॥
ऋषयश्चैव गन्धर्वा मातरश्चान्यदेवताः ।
तत्तच्छक्तिसमोपेता हृदयेऽञ्जलिसंयुताः ॥
सम्भ्रान्तमनसोपेतास्संवीक्ष्य परितस्स्थिताः ।
एवं कल्याणमूर्तिस्तु अर्धनारीश्वरं ततः ॥

(अंशुमद्भेदागमेऽष्टषष्टपटले ॥)

जटामकुटसंयुक्तश्चन्द्रार्धकृतशेखरः ।
त्रिदृक् चतुर्भुजश्चैव नवयौवनगाद्दुतः[२] ॥
समभङ्गयुतो देवः स्थानकस्थः प्रकीर्तितः ।
सकुञ्चसन्यसत्पादस्थितसव्येतराङ्घ्रिकः ॥

---

१ 'शम्भोर्वै नासिसीमान्तं श्रेष्ठायामं स्तनान्तक' मिति पाठान्तरम् । एतदनन्तरं 'ययोर्मध्येऽष्टवाभाज्यं नवधात् केशवोदयम्' इत्यादर्शान्तरे वर्तते ।
२ 'नवयौवनगर्वित' इति पाठान्तरम् ।

इन्दुशेखरहस्ताभपरहस्तद्वयान्वितः ।
जलसङ्ग्रहणे योग्यवरवामकरान्वितः ॥

स्वदक्षिणगृहीतो वा दक्षहस्तः प्रसन्नधीः ।
पूर्ववत्कथितं देव्या मानं विप्रोत्तमास्त्विह ॥

देवीदृगास्यचिबुककक्षचूचुकमानता ।
तद्देव्यपरभागस्था श्रीदेवी सर्वलक्षणैः ॥

युक्ता देविकटिस्पृष्टकराभ्यामपि संयुता ।
देवोच्चदशभागैकभागादेकादशावधि ॥

भागमानयुतः श्यामः किरीटमकुटान्वितः ।
प्रहीतशङ्खचक्रश्च हस्ताभ्यां धृतयापि च[1] ॥

तोयकुण्डिकयोपेतो विष्णुरेष उदाहृतः ।
तदूर्ध्वे दक्षिणं हस्तं धारापाताय कल्पितम् ॥

हरेरुक्तप्रमाणेन ब्रह्माणमपि कारयेत् ।
चतुर्मुखं चतुर्बाहुं जटामकुटमण्डितम् ॥

होमोन्मुखं प्रसन्नं तं कुङ्कुमक्षोदसन्निभम् ।
मौञ्जीमेखलयोपेतं सोपवीतोत्तरीयकम् ॥

वामेतरकरावूर्ध्वौ कमण्डल्वक्षधारकौ ।
वराभयकरौ पूर्वौ स्यातां तौ दक्षिणेतरौ ॥

---

[1] 'धृतवापि च' इति पाठान्तरम् ।

सूचिपादक्रियो(सूचीपताकयो?)पेतावन्यौ तु कटकामुखौ[1] ।
ब्रह्मरूपमिति ख्यातं तथा पद्मासनस्थितम् ॥
देवस्याङ्गुलमानेन द्वाविंशत्यङ्गुलो भवेत् ।
अग्निकुण्डस्य विष्कम्भास्त्रिमेखलयुतस्य च ॥
मेखलैकाङ्गुला प्रोक्ता प्रत्येकं मुनिपुङ्गवाः! ।
द्वादशाङ्गुलविस्तारदैर्घ्यो सा सप्तजिह्वकः ॥
पञ्चजिह्वायुतो वाग्निः कुण्डमध्यस्थितस्त्वयम् ।

(उत्तरकामिकागमे अष्टपञ्चशत्तमपटले ॥)

अथ कल्याणमूर्तेस्तु लक्षणं सर्वमङ्गलम् ।
सुस्थितं वामपादं तु दक्षिणं कुञ्चितं भवेत् ॥
दक्षिणं पूर्वहस्तं तु गौरीदक्षिणहस्तधृक् ।
वरदं वामहस्तं तु परहस्तद्वये तथा ॥
दक्षिणे परशुं वामे तथा कृष्णमृगं परम् ।
जटामकुटसंयुक्तं सर्वाभरणभूषितम् ॥
देहं प्रवालवर्णाभं देवेशस्य विशेषतः ।
तत्र श्यामनिभा देवी प्राग्वन्मादिन(मानादि?)संयुता ॥
उत्पलं वामहस्ते तु धृत्वा दक्षिणहस्तकम् ।
शम्भोर्हस्तेन सङ्ग्राह्यं लज्जाभरणसंयुता ॥

---

१ 'सवपातकरोपेता' विति पाठान्तरम् ।

पार्वतीमनुगा श्रीभूस्सर्वाभरणभूषिता ।
हस्ताभ्यां संस्पृशेदेवं गौरीमपि करद्वये ॥

देवाग्रे कारयेत्कुण्डे तत्र होमं प्रजापतिः ।
शम्भोर्वै स्तनसीमान्तं प्रजेशस्योदयं तथा ॥

चतुर्भुजं चतुर्वक्त्रं सर्वाभरणभूषितम् ।
प्रागग्रौ देविदेवेशौ देवी देवस्य दक्षिणे ॥

दक्षिणाभिमुखो विष्णुर्होमस्योत्तरदिक्स्थितः ।
शम्भोर्वै नाभिसीमान्तं श्रेष्ठं स्तनतलोन्नतम् ॥

कन्यतं(सं?) तु तयोर्मध्ये पूर्ववन्नवधा स्मृतम् ।
श्यामवर्णसमायुक्तं शङ्खचक्रौ परे करे ॥

हिरण्यकरकेणापः पूर्वहस्तद्वयेन तु ।
संगृह्य वरदे हस्ते दद्यादुकपूर्वकम् ॥

अष्टलोकेशविद्येशास्सिद्धयक्षगणादयः ।
ऋषयश्चैव गन्धर्वा मातरश्चान्यदेवताः ॥

तत्तच्छक्तिसमोपेता हृदयाञ्जलिसंयुताः ।
संभ्रान्तमनसोपेतास्संवीक्ष्य परितस्स्थिताः ॥

(शिल्परत्ने द्वाविंशपटले ॥)

सचन्द्रार्धजटामौलिसौम्यं प्रथमयौवनम् ।
चतुर्भुजं त्रिनेत्रं च हारकेयूरभूषितम् ॥

मेखलोदरबन्धं च क्षौमवस्त्रधरं शुभम् ।
वासुकिः कुण्डलं काञ्ची तक्षको हारपुष्करम् ॥
किं च त्रिभङ्गिकं कायं दक्षपादं तु कुञ्चितम् ।
वरदं वामहस्तं तु कृष्णापरशुहस्तकम् ॥
देवस्य दक्षहस्ते तु देवीहस्तं तु संयुतम् ।
नास्यन्तं वापि चास्यान्तं हिक्कासूत्रसमं तु वा ॥
पीनोरःपीतगन्धां (पीनगण्डां) च पीनस्तनसमन्विताम् ।
द्विबाहुकां द्विनेत्रां च सर्वाभरणभूषिताम् ॥
दुकूलवसनां देवीं कुर्याद्देवस्य सव्यके ।
देवस्यायाममानं तु विभजेद् द्वादशाङ्गुलम् ॥
रुद्रांशं वा नवांशं वा वस्वंशं वैकहीनकम् ।
आयामं तद्धरेः प्रोक्तं तस्य बाहुसमन्वितम् ॥
चिबुकान्तं वाथ कक्षान्तं लक्ष्म्यायामं प्रकीर्तितम् ।
विष्णुबिम्बसमं वापि तद्वस्वंशैकहीनकम् ॥
सप्तभागैकहीनं वा रसांशैकविहीनकम् ।
अजायाममिदं तस्य चतुर्भागैकभागता ॥
अग्निज्वालोच्छ्रयं प्रोक्तं तस्यार्धं विस्तृतं भवेत् ।
देवीलक्षणमेवं स्याल्लक्ष्म्याश्च लक्षणं शृणु ॥
नागहस्तसमौ बाहू केयूरकटकोज्ज्वलौ ।
शोभनाम्बरसंपन्ना श्रोणी च विपुला तथा ॥

मेखला अक्षिसूत्राङ्गा उमापार्श्वेवगार्थता (?) ।
एवं लक्ष्मीस्समाख्याता विष्णुरूपमथोच्यते ॥
किरीटमकुटोपेतं कटिसूत्रोदरबन्धनम् ।
केयूरकटकं चैव यज्ञसूत्रसमन्वितम् ॥
लम्बसूत्रसमायुक्तं पीताम्बरसमायुतम् ।
मकरंकुण्डलोपेतं श्रीवत्सं वक्षसि स्थितम् ॥
शङ्खचक्रधरं कुण्डं हस्तद्वयेन धारिणम् ।
जलधारोन्मुखं किंचिद्वक्रेणैव समायुतम् ॥
विष्णुरूपं समाख्यातं ब्रह्मरूपमथ श्रृणु ।
चतुर्भुजं(मुखं?) चतुर्बाहुं कमण्डल्वक्षधारिणम् ॥
यज्ञसूत्रोत्तरीयं तु जटामकुटसंयुतम् ।
सव्यहस्तेऽक्षमालां च वामहस्ते कमण्डलुम् ॥
स्रुवं दक्षिणहस्ते तु पताका वामहस्तके ।
अम्बुजासनकासीनं ब्रह्माणं होमसंमुखम् ॥
एवं वैवाह्यमुद्दिष्टमुमया सहितं श्रृणु ।

(पूर्वकारणागमे एकादशपटले ॥)

वृषवाहनमूर्तिः ।

वृषवाहनमूर्तेस्तु लक्षणं वक्ष्यतेऽधुना ।
दक्षिणं सुस्थितं[1] पादं वामपादं तु कुञ्चितम् ॥

---

१ 'स्वस्तिक' मिति पाठान्तरम् ।

वृषस्य मस्तकोर्ध्वे तु न्यसे(स्ये?)द्वै वामकूर्परम् ।
हिक्कासूत्रादधो विप्र! कला वा द्विर्नवाङ्गुलम् ॥

तस्मादासनसीमकं वृषस्योच्छ्रयं स्यातम्[१] ।
पक्षषोडशमात्रं वा नतं तत्सिंहकर्णवत् ॥

वक्रदण्डायुधं तस्मिन् कल्पयेत्तु चलाचलम् ।
स्थिताङ्घ्रिजानूर्ध्वसीमाद्धिक्कासूत्रान्तमुन्नतम् ॥

कनिष्ठिकापरीणाहमग्रं वक्रत्रयान्वितम् ।
लोहजं दारुजं वाथ वक्रदण्डैवमाचरेत् ॥

परहस्तद्वयोश्चैव टङ्कक्रुष्णमृगं धरेत् ।
टङ्कं दक्षिणहस्ते तु वामहस्ते मृगं धरेत् ॥

जटामकुटसंयुक्तं जटाभारं तु लम्बितम् ।
जटाबन्धशिरो वापि कर्तुरिच्छावशान्नयेत् ॥

सर्वाभरणसंयुक्तं रक्ताभं रक्तवाससम् ।
वामपार्श्वे त्वु(ह्यु?)मादेवी दक्षिणे वा विशेषतः ॥

सुस्थितं दक्षिणं पादं वामपादं तु कुञ्चितम् ।
उत्पलं दक्षिणे हस्ते वामहस्तं प्रसारितम् ॥

---

१ 'वामकोर्परलम्बस्या तस्मादास्तनसीमकम् । वृषभस्योच्छ्रयं स्यातं पादस्थाकधीताङ्गुलम् ।' इति पाठान्तरम् ।

श्रीमानोक्तविधानेन उमादेवीं तु कारयेत् ।
वृषवाहनमाख्यातं नृत्तमूर्तिमथ शृणु ॥

(अंशुमद्भेदागमे चतुष्षष्टपटले ॥)

वृषारूढप्रतिष्ठां तु वक्ष्ये तल्लक्षणान्विताम् ।
चतुर्भुजस्त्रिनेत्रस्तु जटामकुटसंयुतः ॥
परशुर्दक्षिणे हस्ते वामहस्ते मृगो भवेत् ।
पूर्वदक्षिणहस्तस्तु कटको वक्रदण्डयुक् ॥
अस्य सव्यप्रकोष्ठं तु विन्यसेद्वृषमस्तके ।
स हस्तो हंसपक्षो वा पतकाधोमुखस्तु वा ॥
तन्मध्यमाङ्गुलाग्रेण नाभिसूत्रसमं भवेत् ।
तस्यैवा दक्षिणे देवीं कारयेल्लक्षणान्विताम् ॥
अथ स्वदक्षिणे गौरीयुक्तो वा मूर्त्यपेक्षया ।
आयुधव्यतिरिक्तैस्स्वैरङ्गैस्तु विपरीतकैः ॥
संयुक्तो वा वृषारूढस्त्वेवं मुक्तिप्रदो भवेत् ।
पृष्ठस्थो वृषभः कार्य्यो देवजानूरुकोच्छ्रयः ॥
मेढ्रान्तो नाभिसीमान्तश्शेषं सर्वं तु पूर्ववत् ।

(उत्तरकामिकागमे द्विषष्टितमपटले ॥)

वृषारूढमथो वक्ष्ये वृषभं पृष्ठतस्स्थितम् ।
उमारुद्रौ स्थितौ कृत्वा कूर्परं वृषमस्तके ॥

मृगं परशुसंयुक्तं कर्तव्यं वृषवाहनम् ।

(सुप्रभेदागमे चतुस्त्रिंशत्तमपटले ॥)

दक्षिणं सुस्थितं पादं वामपादं तु कुञ्चितम् ।
वृषस्य मस्तकोर्ध्वे तु न्यस्येद्वै वामकोर्परम् ॥

तस्य दक्षिणहस्ते तु वक्रदण्डमुदाहृतम् ।
कनिष्ठाङ्गुलिपरिणाहं मध्ये वक्रत्रयान्वितम् ॥

लोहजं दारुजं वापि वक्रदण्डं प्रकल्पयेत् ।
परहस्तद्वयोश्चैव टङ्कं कृष्णमृगं न्यसेत् ॥

जटामकुटयुक्तं वा जटाभारं तु लम्बितम् ।
जटाबन्धशिरो वापि कर्तरिम्ना(कर्तुरिच्छा?)नुसारतः ॥

सर्वाभरणसंयुक्तं रक्ताभं रक्तवाससम् ।
वामपार्श्वे तु वा देवी दक्षिणे वा विशेषतः ॥

सुस्थितं दक्षिणं पादं वामपादं तु कुञ्चितम् ।
उत्पलं दक्षिणे हस्ते वामहस्तं प्रलम्बितम् ॥

(शिल्परत्ने द्वाविंशपटले ॥)

गौरीश्वरौ स्थितौ पीठे वृषभं पृष्ठतस्स्थितम् ।
त्रिनेत्रं चतुर्भुजं चैव जटामकुटसंयुतम् ॥

दिव्याम्बरधरो देवस्सर्वाभरणभूषितः ।
परशुं दक्षिणे हस्ते वामे कृष्णसमन्वितम् ॥

कटकं दक्षिणे हस्तं वृषभस्यैव मस्तके ।
वामहस्ते प्रकोष्ठं तु स्थापितं कुरु बुद्धिमान् ॥

तस्यैव वामभागे तु देवीं कुर्याद्विचक्षणः ।
वृषारूढमिदं प्रोक्तं त्रिपुरारिं शृणुष्वथ ॥

(पूर्वकारणागमे एकादशपटले ॥)

विषापहारमूर्तिः ।

एकवक्त्रं त्रिनयनं जटामकुटसंयुतम् ।
चतुर्बाहुं सुरक्तं समृगं परशुधारिणम् ॥

दक्षहस्ते गरं धृत्वा पानोन्मुखमदेक्षणम् ।
वरदं वामहस्ते तु सर्वालङ्कारसंयुतम् ॥

देवस्य वामपार्श्वे तु देवीं चैव तु कारयेत् ।

श्यामां द्विनेत्रां द्विभुजां त्रिभङ्गीं
सव्यापसव्यस्थितकुञ्चिताङ्घ्रिम् ।
कण्ठे निपीड्यस्थितसव्यलम्बां
चिन्ताकुलामीश्वरतुष्टिदात्रीम् ॥

पीतवस्त्रां द्विनयनां वाञ्छितार्थफलप्रदां ।

(श्रीतत्वनिधौ ॥)

अथातस्संप्रवक्ष्यामि विषापहरणेश्वरम् ।
चतुर्भुजं त्रिनेत्रं च किञ्चिद्दंष्ट्रकरालनम्(क ?) ॥

जटारत्ननिभं विद्यात् पूर्णचन्द्रनिभाकृतिम् ।
त्रिशूलं गण्डिकां चैव गोकर्णाकृति दक्षिणे ॥

कपालं वामहस्ते च वामे गौरीसमायुतम् ।
वामपादं तु शयनं लम्बितं सव्यपादकम् ॥

महोक्षस्थं महाभीमं कालकूटविषाशनम् ।
कण्ठमध्ये महाकालमाबध्य गौरिपाणिना ॥

व्याघ्रचर्माम्बरधरं किङ्किणीमालयावृतम् ।
वृश्चिकाभरणोपेतं सर्वाभरणभूषितम् ॥

एवं महेश्वरं ध्यात्वा प्रतिष्ठां साधकोत्तमः ।

(उत्तरकारणागमे ॥)

सदाशिवादिमूर्तयः ।

सदाशिवादिमूर्तयः ।

सदाशिवः ।

सदेशस्थापनं वक्ष्ये तल्लक्षणपुरस्सरम् ।
द्रव्यैशिलादिभिः कुर्य्यात्पूर्वोक्तैस्तं विशेषतः ॥

बद्धपद्मासनं श्वेतं स्थितं पञ्चास्यसंयुतम् ।
पिङ्गलाभजटाचूडं (जूटं ?) दशदोर्दण्डमण्डितम् ॥

अभयं च प्रसादं च तथा शक्तिं त्रिशूलकम् ।
खट्वाङ्गं दक्षभागस्थैर्वहन्तं करपल्लवैः ॥

भुजङ्गं चाक्षमालां च डमरुं नीलपङ्कजम् ।
बीजापूरं(बीजपूरं ?) च वामस्थैर्वहन्तं सुप्रसन्नकम् ॥

अर्चनाध्यायसंसिद्धध्यानान्तरयुतं तु वा ।
इच्छाज्ञानक्रियाशक्तित्रयसंकुललोचनम् ॥

ज्ञानचन्द्रकलायुक्तं कलावर्षोपलक्षितम् ।
ब्रह्मसूत्रादिकं कार्य्यं सुवेशः प्रतिमोदितम् ॥

एवं सदाशिवः कार्यो मनोन्मन्या समन्वितः ।

(उत्तरकामिकागमे त्रिचत्वारिंशत्तमपटले ॥)

महासदाशिवमूर्तिः ।

प्रसन्नपञ्चविंशकस्फुटाननं जटाधरं
सुपञ्चसप्ततीक्षणं कपोलकुण्डलाङ्कितम् ।
शतार्धहस्तभूषितं वराभयान्वितं सितं
भुजङ्गभूषणं परं भजे महासदाशिवम् ॥
(मानसारे ॥)

ईशानादयः ।

ईशस्तत्पुरुषाघोरवामजातक्रमेण तु ।
सितपीतकृष्णरक्ताश्चतुर्वर्णाः प्रकीर्तिताः ॥
पञ्चवक्त्रास्स्मृतास्सर्वे दशदोर्दण्डभूषिताः ।
खड्गखेटधनुर्बाणकमण्डल्वक्षसूत्रिणः ॥
वराभयकरोपेताश्शूलपङ्कजपाणयः ।
(विष्णुधर्मोत्तरे ॥)

ईशानः ।

शुद्धस्फटिकसङ्काशो जटाचन्द्रविभूषितः ।
अक्षत्रिशूलहस्तश्च कपालं वामतोऽभयम् ॥
(रूपमण्डने ॥)

वेदाभयेष्टाङ्कुशपाशटङ्ककपालढक्काक्षकशूलपाणिः ।
सितद्युतिः पञ्चमुखोऽवतान्मामीशान ऊर्ध्वं परमप्रकाशः ॥
(शैवे कारणागमे ॥)

तत्पुरुषः ।

पीताम्बरस्तत्पुरुषः पीतयज्ञोपवीतवान् ।
मातुलिङ्गं करे वामेऽक्षमाला दक्षिणे तथा ॥

(रूपमण्डने ॥)

प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणिः ।
चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितो रक्षतु मामजस्रम् ॥

(शैवे कारणागमे ॥)

अघोरः ।

दंष्ट्राकरालवदनं सर्पशीर्षं त्रिलोचनम् ।
रुण्डमालाधरं देवं सर्पकुण्डलमण्डिताम् ॥
भुजङ्गकेयूरधरं सर्पहारोपवीतिनम् ।
यो वस्ते कटिसूत्रं च गले वृश्चिकमालिकाम् ॥
नीलोत्पलदलश्यामं अतसीपुष्पसन्निभम् ।
पिङ्गाक्षं पिङ्गजटिलं शशाङ्ककृतशेखरम् ॥
तक्षकः पुष्टिकश्चैव पादयोस्तस्य नूपुरौ ।
अघोररूपकं कुर्यात्कालरूपमिवापरम् ॥
महावीर्यं महोत्साहमष्टबाहुं महाबलम् ।
त्रासयन्तं रिपोस्सङ्घं निवेशो यत्र भूतले ॥
खट्वाङ्गं च कपालं च खेटकं पाश एव च ।
वामहस्तेषु कर्तव्यमिदं शस्त्रचतुष्टयम् ॥

त्रिशूलं परशुः खड्गो दण्डश्चैवारिमर्दनः ।
शस्त्राण्येतानि चत्वारि दक्षिणेषु करेषु च ॥

(रूपमण्डने)

कुठारखेटाङ्कुशपाशशूलकपालढक्काक्षगुणान्दधानः ।
चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादघोरो दिशि दक्षिणस्याम् ॥

(शैवे कारणागमे ॥)

वामदेवः ।

रक्ताम्बरधरं देवं रक्तयज्ञोपवीतिनम् ।
रक्तोष्णीषं रक्तनेत्रं रक्तमाल्यानुलेपनम् ॥
जटाचन्द्रधरं कुर्यात्त्रिनेत्रं तुङ्गनासिकम् ।
वामदेवं महाबाहुं खड्गखेटकधारिणम् ॥
सर्वालङ्कारसंयुक्तं रक्तकुण्डलधारिणम् ।

(रूपमण्डने ॥)

वराक्षमालाभयटङ्कहस्तस्सरोजकिञ्जल्कसमानवर्णः ।
त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः ॥

(शैवे कारणागमे ॥)

सद्योजातः ।

शुक्लाम्बरधरं देवं शुक्लमाल्यानुलेपनम् ।
जटाभारयुतं कुर्य्याद्बालेन्दुकृतशेखरम् ॥

त्रिलोचनं सौम्यमुखं कुण्डलाभ्यामलङ्कृतम् ।
सद्योजातं महोत्साहं वरदाभयपाणिकम् ॥

(रूपमण्डने)

कुन्देन्दुशङ्खस्फटिकावभासो वेदाक्षमालावरदाभयाङ्कः ।
त्र्यक्षश्चतुर्वक्त्र उरुप्रभावस्सद्योऽधिजातोऽवतु मां प्रतीच्याम् ॥

(शैवे कारणागमे ॥)

महेशः ।

पञ्चमूर्ध्नं चतुर्वक्त्रं नेत्रैर्द्वादशभिर्युतम् ।
चतुरास्यं चतुर्नासी वसुश्रोत्रं चतुर्गळम् ॥

तनुरेतद्विपादं हि सायुधं दशबाहुकम् ।
शुद्धस्फटिकसङ्काशं सूर्यकोटिसमप्रभम् ॥

चन्द्रांशुहिमशीतं च सर्वाभरणभूषितम् ।
शुक्लाम्बरधरं देवं शुक्लयज्ञोपवीतिनम् ॥

अभयं शूलपरशुं वज्रं खड्गं च दक्षिणे ।
खेटकाङ्कुशपाशं च घण्टां वरदवामके ॥

कुर्यादेवं महेशं तु शक्तेस्तु लक्षणं शृणु ।
चतुर्भुजां त्रिनेत्रां च सर्वालङ्कारसंयुताम् ॥

नितम्बतटविस्तीर्णां मध्यक्षामां स्तनोन्नताम् ।
दक्षिणे चोत्पलोपेतां वामहस्ते स्रजं धरीम् ॥

वरदाभयहस्तां वै दुकूलवसनान्विताम् ।
करण्डमकुटोपेतामीश्वरस्य तु वामके ॥
पीठे चैकासने युक्तां तत्प्रभामण्डले स्थिताम् ।
चन्द्रार्काग्निप्रतीकाशां जगन्मङ्गलकारकाम् ॥
कारयेदीश्वरीमेवं वामादीनां शृणुष्वहि ।

(सुप्रभेदागमे चतुस्त्रिंशत्तमपटले ॥)

रुद्राः ।

चतुर्भुजास्त्रिनेत्राश्च जटामकुटमण्डिताः ।
शुक्लवस्त्रधरास्सर्वे शुक्लवर्णाः प्रकीर्त्तिताः ॥
सपादस्थानकास्सर्वे पद्मपीठोपरि स्थिताः ।
सर्वाभरणसंयुक्ताः सर्वपुष्पैरलङ्कृताः ॥
अभयं परशुं सव्ये कृष्णं वरद वामके ।
महादेवश्शिवो रुद्रः शङ्करो नीललोहितः ॥
ईशानो विजयो भीमो देवदेवो भवोद्भवः ।
कपालीशश्च विज्ञेया रुद्रा एकादशाः (?) पराः ॥

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

अजः ।

अथ रुद्रान् प्रवक्ष्यामि बाहुषोडशकान्वितान् ।
अजनामा महारुद्रो धत्ते शूलमथाङ्कुशम् ॥

कपालं डमरुं सर्पं मुद्गरं च सुदर्शनम् ।
अक्षसूत्रमधो दक्षे तथा वामे कराष्टके ॥
तर्जनीमूर्ध्वतस्तत्र खट्वाङ्गं तदधःकरे ।
गदां च पट्टिशं घण्टां शक्तिपरशुकुण्डिकाः ॥

एकपादः ।

एकपादाभिधो बिभ्रत् क्ष्वेडादः स्याद्वहन् शरम् ।
चक्रं डमरुकं शूलं मुद्गरं तदधो वरम् ॥
अक्षसूत्रमधो वामे खट्वाङ्गं चोर्ध्वहस्तके ।
धनुर्घण्टां कपालं च कौमुदीं तर्जनीं घटम् ॥
परशुं चक्रमाधत्ते क्रमाद्वाह्वष्टके त्विति ।
अनेकभोगसंपत्तिं कुरुते यजनात्सदा ॥

(विश्वकर्मशास्त्रे ॥)

ध्यायेत्कोटिरविप्रभं त्रिनयनं शीतांशुगङ्गाधरं
हस्ते टङ्कमृगं वराभयकरं पादैकयुक्तं विभुम् ।
शंभोर्दक्षिणवामकक्षभुजयोर्ब्रह्माच्युताभ्यां स्थितं
तत्तल्लक्षणमायुधैः परिवृतं हस्तद्वयाढ्यांजलिम् ॥
ब्रह्माण्डप्रलये सुसंस्थितपदं ब्रह्माण्डमध्यस्थितं
ह्येवं लक्षणसंयुतं पुरहरं पादैकमूर्तीकृतम् ।

एकपादमिति ख्यातं सुखासीनम् । रक्तवर्णः । पक्षान्तरे श्वेत-वर्णोऽपि प्रसिद्धः ।

(श्रीतत्त्वनिधौ ॥)

अहिर्बुध्नः ।

अहिर्बुध्नो गदां चक्रं चासिं डमरुमुद्गरौ ।
शूलाङ्कुशाक्षमालाश्च दक्षोर्ध्वाधःकरैः क्रमात् ॥
तोमरं पट्टिशं चर्म कपालं तर्जनीं घटम् ।
शक्तिं परशुकं वामे दक्षवद्धारयत्यसिम् ॥

विरूपाक्षः ।

विरूपाक्षस्ततः खड्गं शूलं डमरुकाङ्कुशौ ।
सर्पं चक्रं गदामक्षसूत्रं बिभ्रत्कराष्टके ॥
खेटं खट्वाङ्गकं शक्तिं परशुं तर्जनीं घटम् ।
घण्टाकपालकौ चेति वामोर्ध्वादिकराष्टके ॥

रेवतः ।

रेवतो दक्षिणे चापं खड्गशूलं गदामहिम् ।
चक्राङ्कुशाक्षमालास्तु धारयन्नूर्ध्वमादितः ॥
धनु(धनुः ?)खेटं च खट्वाङ्गं घण्टातर्जनिकां ततः ।
परशुं पट्टिशं पात्रं वामबाहु[ष्ट]केऽर्कवत् ॥
सर्वसंपकरोत्येष (संपत्करो ह्येष ?) जायते वार्चनाद्दृशम् ।

हरः ।

हराख्यो मुद्गरं चैव डमरुं शूलमङ्कुशम् ।
गदासर्पाक्षसूत्राणि धारयन् दक्षिणोर्ध्वतः ॥
पट्टिशं तोमरं शक्तिं परशुं तर्जनीं घटम् ।
खट्वाङ्गं पट्टिकां चेति वामोर्ध्वादिक्रमेण तु ॥

बहुरूपः ।

बहुरूपो दधद्दक्षे डमरुं च सुदर्शनम् ।
सर्पं शूलाङ्कुशौ चैव कौमुदीं जपमालिकाम् ॥
घण्टाकपालखट्वाङ्गं तर्जनीं कुण्डिकां धनुः ।
परशुं पट्टिशं चैव वामोर्ध्वादिकराष्टके ॥

त्र्यम्बकः ।

त्र्यम्बकोऽपि दधच्चक्रं डमरुं मुद्गरं शरम् ।
शूलाङ्कुशाहिजाप्यं च दक्षोर्ध्वादिक्रमेण हि ॥
गदाखट्वाङ्गपात्राणि कार्मुकं तर्जनीघटौ ।
परशुं पट्टिशं चैव वामोर्ध्वादिकराष्टके ॥

सुरेश्वरः ।

सुरेश्वरो हि डमरुं चक्रं शूलाङ्कुशावपि ।
शरं च मुद्गरं चापं दक्षबाह्वष्टके त्विति ॥
पङ्कजं परशुं घण्टां पट्टिशं तर्जनीं धनुः ।
खट्वाङ्गं कारयेत्पात्रं वामेऽष्टकरपल्लवे ॥

जयन्तः ।

जयन्तो दशमो रुद्रोऽप्यङ्कुशं चक्रमुद्गरौ ।
शूलाहिडमरुं बाणमक्षसूत्रं यमे त्विति ॥
गदाखट्वाङ्गपरशुं कपालं शक्तिं तर्जनीम् ।
धनुः कुण्डीमथोर्ध्वादिवामबाह्वष्टके दधत् ॥

अपराजितः ।

अथापराजितो दक्षे तोमरं खड्गमङ्कुशम् ।
शूलाहिचक्रडमरुमक्षमालां दधत्क्रमात् ॥
शक्तिं खेटं गदां पात्रं तर्जनीं पट्टिशं कजम् ।
घण्टामुत्तरतश्चाथ धारयन्नूर्ध्वमादितः ॥
अजैकपादहिर्बुध्नो विरूपाक्षश्च रेवतः ।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥
रुद्रा एकादश प्रोक्ता जयन्तश्चापराजितः ।

(विश्वकर्मशास्त्रे ॥)

मृत्युञ्जयः ।

कपालमालिनं श्वेतं शशाङ्ककृतशेखरम् ।
व्याघ्रचर्मधरं मृत्युञ्जयं नागेन्द्रभूषितम् ॥
त्रिशूलमक्षमाला च दक्षयोः करयोस्स्मृतः ।
कपालं कुण्डिकां वामे योगमुद्राकरद्वयः ॥

किरणाक्षः ।

चतुर्भुजो महाबाहुः शुक्लपादाक्षपाणिकः ।
पुस्तकाभयहस्तोऽसौ किरणाक्षस्त्रिलोचनः ॥

श्रीकण्ठः ।

चित्रवस्त्रधरं कुर्याच्चित्रयज्ञोपवीतिनम् ।
चित्ररूपं महेशानं चित्रैश्वर्यसमन्वितम् ॥
चतुर्बाहुं चैकवक्त्रं सर्वालङ्कारभूषितम् ।
खड्गं धनुः शरं खेटं श्रीकण्ठं बिभ्रतं भुजैः ॥

(रूपमण्डने ॥)

विद्येश्वराः ।

दिग्वर्णा जटिलस्त्र्यक्षाश्शरत्रिशूलधारिणः ।
पुटाञ्जलिकरास्सर्वे विद्येशाश्चैकवक्त्रकाः ॥

अनन्तश्च त्रिमूर्तिश्च सूक्ष्मः श्रीकण्ठ एव च ।
शिवश्शिखण्ड्येकनेत्र एकरुद्रश्च ते क्रमात् ॥

(विष्णुधर्मोत्तरे ॥)

अनन्तेशस्तथा सूक्ष्मश्शिवोत्तमश्चैकनेत्रकः ।
एकरुद्रस्त्रिमूर्तिश्च श्रीकण्ठश्च शिखण्डिनः ॥

अष्टविद्येश्वरा ह्येते त्रिनेत्राश्च चतुर्भुजाः ।
अभयंवरदोपेताष्टङ्कशूलधरास्तथा ॥

रक्तकुन्दस्तथा नीलं पीतं कृष्णं च कुङ्कुमम् ।
अरुणं भिन्नाञ्जनप्रख्यं क्रमाद्विद्येशवर्णकम् ॥

जटामकुटसंयुक्ता उपवीतसमन्विताः ।
सर्वाभरणसंयुक्ताश्शान्तवक्त्रसमन्विताः ॥

विद्येशाकृतिरेवं स्याद् दिक्पालाकृतिरुच्यते ।

(पूर्वकारणागमे चतुर्दशपटले ॥)

अनन्तः ।

अनन्तश्चतुर्भुजस्सौम्यस्सर्वाभरणभूषितः ।
जपापुष्पनिभाकारः करण्डमकुटान्वितः ॥

सितवस्त्रधरः शान्तस्त्रिनेत्रः पद्मसंस्थितः ।
अभयवरदोपेतो गङ्गा(टङ्क?)शूलधरश्शुचिः ॥

त्रिमूर्तिः ।

एकरुद्रमिवात्रैव त्रिमूर्तिं चैव कारयेत् ।
(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

रक्तवर्णस्त्रिनेत्रश्च वरदाभयहस्तकः ।
कृष्णापरशुसंयुक्तो जटामकुटमाण्डितः ॥
ऋज्वागतस्तथैकेन पादेनापि समन्वितः ।
दक्षिणोत्तरयोश्चैव पार्श्वयोरुभयोरपि ॥
कटिप्रदेशादूर्ध्वे तु ब्रह्मविष्णूर्ध्वकाययुक् ।
स्त्रीमानवत्तयोर्मानं ब्रह्मविष्ण्वोस्तु कल्पयेत् ॥
कृताञ्जलिपुटावेकपादयुक्तौ च वा मतौ ।
अथवा शिवलिङ्गस्य पार्श्वयोन्तर्गतौ कृतौ ॥
अथवा तौ पृथक् स्थाप्यावेकविष्टरमास्थितौ ।
अथवा मध्यमे लिङ्गं पृथगालयसंस्थितम् ॥
तस्य सव्येऽप्यसव्ये च ब्रह्मविष्णू तथा मतौ ।
पृथग्धामस्थिता वैकधामस्था वा त्रिमूर्तयः ॥
संश्लिष्टधामयुक्ता वा ब्रह्मविष्णुशिवा मताः ।
पूर्वास्याः पश्चिमास्या वा परिवारादिसंयुताः ॥

भिन्नप्राकारगा वापि एकप्राकारसंस्थिताः ।
नृत्तमूर्त्यादिदेवा वा स्थापनीयास्तु मध्यमे ॥
एवं लक्षणमादिष्टं प्रतिष्ठाविधिरुच्यते ।

(उत्तरकामिकागमे एकषष्टितमपटले ॥)

सूक्ष्मः ।

सूक्ष्मो नीलनिभश्शान्तो हेमवस्त्रधरः परः ।
चतुर्भुजस्त्रिनेत्रश्च सर्वाभरणभूषितः ॥
अभयवरदोपेतटङ्कशूलधरस्तथा ।

श्रीकण्ठः ।

अभयवरदोपेतटङ्कशूलधरः परः ।
रक्तवस्त्रसमायुक्तः पद्मपीठोपरि स्थितः ॥
श्रीकण्ठं ह्येवमाख्यातं नागदेवमथोच्यते ।

शिवोत्तमः ।

शिवोत्तमः श्वेतवर्णश्चतुर्दोर्भिस्समन्वितः ।
सर्वाभरणसंयुक्तश्शुक्लवासोपवीतकः ॥
नेत्रद्वयसमायुक्तः करण्डमकुटान्वितः ।
अभयवरदोपेतश्शूलपाशधरश्शुचिः ॥
पद्मपीठोपरिष्टात्तु स्थानकस्समपादकः ।

शिखण्डी ।

शिखण्डिस्त्वञ्जनाभस्तु चतुर्भुजसमन्वितः ।
करण्डमकुटोपेतस्सर्वाभरणभूषितः ॥

रक्तवस्त्रधरश्शान्तस्त्वभयवरदान्वितः ।
खड्गखेटकसंयुक्तः पद्मपीठोपरिस्थितः ॥

एकनेत्रः ।

एकनेत्रश्चतुर्बाहुर्नेत्रत्रयसमन्वितः ।
क्षौमवस्त्रधरश्शान्तो ....कसमप्रभः ॥

जटामकुटसंयुक्तस्सर्वाभरणभूषितः ।
अभयवरदोपेतष्टङ्कशूलसमन्वितः ॥

एकरुद्रः ।

एकाक्षसदृशं त्वेकरुद्रं कुर्य्याद्विशेषतः ।

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

मूर्त्यष्टकम् ।

शर्वो भीमो महादेवो रुद्रः पशुपतिर्भवः ।
उग्र ईशान इत्यष्टौ मूर्तयश्शिवसन्निभाः ॥

मृगाङ्कचूडामणयो जटामण्डलमण्डिताः ।
त्रिनेत्रा वरखट्वाङ्गत्रिशूलवरपाणयः ॥

(विष्णुधर्मोत्तरे ॥)

भवश्शर्वस्तथेशानपशुपत्युग्रकस्तथा ।
रुद्रो भीमो महादेवः कीर्तितास्त्वष्टमूर्तयः ॥

चतुर्भुजास्त्रिनेत्राश्च जटामकुटधारिणः ।
अभयंवरदोपेताष्टङ्ककृष्णधरास्स्मृताः ॥

सर्वाभरणसंयुक्ता रक्तक्षौमधरा इमे ।
शुक्लं श्यामं च रक्तं च कृष्णं गोक्षीरसन्निभम् ॥

काश्मीरं विद्रुमं नीलं भवादीनां तु वर्णकम् ।
अष्टमूर्त्याकृतिर्ह्येवं वसूनामाकृतिं शृणु ॥

(पूर्वकारणागमे चतुर्दशपटले ॥)

शर्वः ।

शर्वश्चतुर्भुजश्शान्तस्सर्वाभरणभूषितः ।
जटामकुटसंयुक्तश्शङ्खकुन्देन्दुसन्निभः ॥

अभयवरदोपेतः खड्गखेटकधारितः ।
पद्मपीठोपरिष्टात्तु स्थानकश्शर्व एव हि ॥

भीमः ।

भीमश्चतुर्भुजो रौद्रस्सर्वाभरणभूषितः ।
जटामकुटसंयुक्तो व्यतिरिक्त(ह्यतिरक्त?)समप्रभः ॥

अभयं वरदं चैव शूलं पाशं च धारयेत् ।
सितवस्त्रधरश्चैव रौद्रदृष्टिस्सदंष्ट्रकः ॥

पशुपतिः ।

पशुपतिं शर्ववत्कृत्वा स्थापयेद्देशिकोत्तमः ।

भवः ।

भवश्चतुर्भुजश्शान्तो जटामकुटमण्डितः ।

अतिरक्तसमप्रख्यस्सर्वाभरणभूषितः ॥

अभयवरदोपेतः शूलपाशधरो भवः ।

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

सुब्रह्मण्यमूर्तिभेदाः ।

सुब्रह्मण्यमूर्तिभेदाः ।

षण्मुखः ।

अथ वक्ष्ये विशेषेण षण्मुखस्य तु लक्षणम् ।
पञ्चतालोत्तमेनैव[1] स्कन्दं कुर्याद्विशेषतः ॥

द्विभुजं वा चतुर्हस्तं षड्भुजं भानुहस्तकम् ।
शक्तिबाणं च पाशं प्रसारितम्[2] ॥

सव्ये वामे तु पिञ्छं च खेटकं कुक्कुटं तथा ।
धनुर्दण्डं हलं चैव भानुहस्तान्यतोद्धृतम्[3] ॥

षड्भुजे त्वभयं खड्गं शक्तिर्दक्षिणपार्श्वके ।
खेटकं चाक्षमाला च कुक्कुटं वामहस्तके ॥

चतुर्भुजेऽभयं शक्तिर्दक्षिणे तु करद्वयम्(ये ?) ।
कुक्कुटं चाक्षमाला च वामहस्तोद्धृतं शुभम् ॥

द्विभुजे कुक्कुटं वामे शक्तिर्दक्षिणहस्तके ।
अत्रानुक्तं तु तत्सर्वमुमास्कन्दोक्तवत्कुरु ॥

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

---

१ उत्तमपञ्चतालेनेत्यर्थः । २ 'शक्तिं बाणं च खड्गं च चक्रं प्रासं प्रसारितम्' इति पाठान्तरम् । ३ 'भानुहस्तान्विते स्थितम्' इति पाठान्तरम् ।

गुहस्य स्थापनं वक्ष्ये तल्लक्षणपुरस्सरम् ।
पुरादेर्मध्यमे वाग्नौ यमे वा मध्यमे तयोः ॥
नैर्ऋते वरुणे वायौ सोमे शर्वेऽथवा भवेत् ।
अन्तरालेऽथवा तेषां शिवधाम्न्येवमेव वा ॥
अन्यदेवालयेऽप्येवमथवा पर्वतोपरि ।
पर्वतस्यान्तिके वापि नद्युद्यानादिकेऽथवा ॥
राजधान्यादिके वाथ पुण्यक्षेत्रे गृहेषु वा ।
प्रासादमण्डपादीनां देशे पुण्यतरुष्वथ ॥
कुमारालय इष्टस्याद्धामलक्षणलक्षितः ।
अथैकादित्रयस्त्रिंशद्धस्तविस्तारसंयुतः ॥
त्रेतायां नवहस्तोर्ध्वं विस्तारो नेष्यते द्विजाः ! ।
दिक्न्यस्तस्कन्दरूपाढ्यः केवलो वा तदालयः ॥
रुद्रोमाविघ्नरूपाढ्यस्त्वथवा हंसकोणयुक् ।
गजकोणे(? !)ऽथवा स स्यात् केवलो वा गुहालयः ॥
एकभूम्यादिसप्तान्ततलेष्विष्टतलान्वितः ।
शिवोक्तमार्गसंक्लृप्तगर्भाद्यष्टकयान्वितः ॥
तद्वन्मूर्धेष्टकास्थूपिप्रतिष्ठाभ्यां समायुतः ।
धाम्नस्संस्थापनेनाढ्यः प्रागुक्तविधिना सह ॥
प्रागुक्तमण्डपाद्यैश्च प्राकाराद्यैश्च मण्डितः ।
पूर्वास्यः पश्चिमास्यो वा दक्षोत्तरमुखस्तु वा ॥

परिवारामरैर्युक्तः कथ्यन्ते ते प्रसङ्गतः ।
यक्षेन्द्रो राक्षसेन्द्रश्च पिशाचेन्द्रश्च भूतराट् ॥
गन्धर्वः किन्नरो दैत्यनायको दानवाधिपः ।
क्रमात्पूर्वादिशर्वान्तस्थिता एते चतुर्भुजाः ॥
वरदाभयसंयुक्ताः खड्गखेटसमन्विताः ।
खड्गखेटसमायुक्ता द्विभुजा वाञ्जनप्रभाः ॥
भीमरूपास्सुशान्ता वा बद्धकेशास्तु वा मताः ।
शकुनी पूतना चैव रेवती चार्धपूतना ॥
वक्त्रमण्डिनि शान्ता च[1] एता देवाष्टमूर्तयः ।
षण्मुखश्शक्तिपाणिश्च कार्तिकेयो गुहस्ततः ॥
स्कन्दो मयूरवाहस्स्यात्सेनानीश्शक्तिहस्तवान् ।
एते वा मूर्तिपास्तस्य कृताञ्जलिपुटान्विताः ॥
वज्रपद्मधरास्सर्वे स्कन्दोक्ता राश्च(कल्मष?)संयुताः ।
चतुर्भुजा द्विहस्ता वा षड्वक्त्राश्चैकवक्त्रकाः ॥
एते वा परितस्स्थाप्याः क्रमात्पूर्वादियोगतः ।
इन्द्रादीन्वाष्टपीठं वा मयूरं वामतो गजम् ॥
विघ्नेशं क्षेत्रपं भानुं महापीठं प्रकल्पयेत् ।
बलिपीठं च शर्वोक्तान्परिवारांस्तु वा न्यसेत् ॥

---

१ ' वक्त्रमण्डुनी शान्ता च ' इति पाठान्तरम् ।

बलिपीठं (ठ?) दलेष्विन्द्रपूर्वान्मध्ये ग्रहेश्वराः ।
द्वारपौ कल्पयेद् द्वारे श्यामरक्तनिभौ क्रमात् ॥
दक्षवामगतौ द्वाराद् द्विभुजौ वा चतुर्भुजौ ।
खड्गखेटधरौ सूचिमुद्राविस्मयसंयुतौ ॥
श्यामाभौ रक्तवर्णौ वा सितकृष्णौ भयङ्करौ ।
जयाख्यविजयाख्यौ द्वौ द्वारपौ विकृताननौ ॥
ईशाने कल्पयेत्स्कन्दचण्डं वेदकरं वरम् ।
अभयं वज्रपद्मे च वहन्तं द्विभुजं तु वा ॥
शाकल्यसंज्ञया ख्यातं तदर्थं पीठमेव वा ।
लक्षणं तस्य संक्षेपाच्छृणुध्वं द्विजसत्तमाः ! ॥
द्रव्यैश्शिलादिभिः कुर्यात्प्रतिमालक्षणोदितैः ।
प्रतिमालक्षणे प्रोक्तं विश्वमानं गुहस्य तु ॥
योजनीयं द्विजा गर्भद्वारस्तम्भादिसंयुतम् ।
द्विभुजश्च द्विनेत्रश्च सुब्रह्मण्यस्सुसुन्दरः ॥
पद्मधृक् सव्यसत्पाणिर्लम्बितेतरसत्करः ।
बालरूपी प्रतिष्ठाप्यो ग्रामस्यैवाभिवृद्धये ॥
द्विहस्तो यज्ञसूत्राढ्यस्सशिखस्सत्रिमेखलः ।
कौपीनदण्डधृक्सव्यपाणिः कट्याश्रितोऽपरः ॥
स्थाप्योऽयं ज्ञानदस्स्कन्दः पर्वतेषु वनादिषु ।
चतुर्भुजस्त्रिनेत्रश्च कर्णयोः पत्रपिण्डयुक् ॥

नक्रकुण्डलयुक्तो वा ह्यक्षशक्तिकरद्वयः ।
वरदाभयसंयुक्तश्शक्तिद्वययुतो न वा ॥

शक्त्यैकया युतो वा स्यात्तयोर्लक्षणमुच्यते ।
द्विनेत्रे द्विभुजे शान्ते पद्मोत्पलकरद्वये ॥

श्यामरक्तनिभे सव्यवामपार्श्वे व्यवस्थिते ।
गौरीलक्षणसंयुक्ते कल्पयेत्तु शिवानने ॥

गजेति गजवल्लीति नाम्ना ख्याते(ते अति ?)तिसुन्दरे ।
इत्थं लक्षणयुक् स्थाप्यः पुरे वा नगरेऽपि वा ॥

षडाननश्च षड्बाहुरर्कश्रोत्रेक्षणान्वितः ।
षट्कर्णस्त्वर्क[क *]र्णो वा षड्भिर्मौलिभिरान्वितः ॥

सशक्तिस्साभयस्सासिस्साक्षमालस्सकुक्कुटः ।
सखेटकस्त्वयं स्थाप्यो वृद्धये राजधानिके ॥

रक्ताम्बरसमायुक्तो बालचन्द्रसमप्रभः ।
करण्डमकुटोपेतो नेत्रत्रयसमन्वितः ॥

शक्तिं च मुसलं खड्गं चक्रं पाशाभये वहन् ।
दक्षिणेऽदक्षिणे वज्रं कार्मुकं खेटकं तथा ॥

मयूरं च ध्वजं चैवमङ्कुशं वरदं वहन् ।
सोपवीतो मयूरस्थश्शक्तिद्वयसमायुतः ॥

ग्रामादौ स्थापनीयोऽयं प्रासादादौ च सिद्धये ।
एवं पञ्चविधः स्कन्दविभागस्स्थानभेदतः ॥

द्वापरे स्यान्न वान्यत्र सर्वे सर्वत्र वा मताः ।

(उत्तरकामिकागमे चतुष्षष्टितमपटले ॥)

अथातस्संप्रवक्ष्यामि स्कन्दस्य स्थापनं परम् ।
तस्योद्भवं समासेन शृणु पूर्वं गजानन ! ॥

देहत्यागेऽपि तां दृष्ट्वा तद्योगमहमभ्यसन् ।
सती चाङ्गं पुनर्गत्वा सुता हिमवतस्तथा[१] ॥

गिरिपार्श्वे तपः कृत्वा तत्सुता पार्वती भवेत् ।
आवयोस्सङ्गमं(: ?) तत्र देवैस्संप्रार्थितो यतः ॥

रेतो वह्निस्तु संग्राह्य क्षिप्त्वा शरवणे च तु ।
तस्माच्छरवणोभावो नाम इत्यपि कीर्तितः ॥

षट्कृत्तिकायां स्थपनं(स्तन्यपानात् ?) षण्मुखस्त्वभिधीयते ।
तेनैव कार्तिकेयस्तु बालहीनां हि तद्भवेत्(लानां हितकृद् भवेत् ?) ॥

प्रासादं विधिवत्कृत्वा प्रतिमां तदनन्तरम् ।
शिलामृद्दारुलोहैर्वा नवतालेन मानयेत् ॥

द्विहस्तो वा चतुर्बाहुरष्टबाहुरथापि वा ।
द्विभुजं पद्महस्तं तु वज्रं शक्तिं तथापरे ॥

---

१ आदर्शान्तरे एतदनन्तरं 'षट्कृत्तिकास्तन्यपानात् षण्मुखस्त्वभिधीयते । तेनैव कार्तिकेयस्तु बालानां हितकृद् भवेत्' इति वर्तते । न तु 'गिरिपार्श्वे तपः कृत्वे' त्यादिवचनानि ॥

अभयं वरदं पूर्वे चतुर्बाहुरिति स्मृतम् ।
खड्गखेटकमूर्ध्वे तु पाशं पद्मं तथाष्टकम् ॥

आसनं स्थानकं वापि यानं वै त्रिविधं तथा ।
आसनं द्विभुजं प्रोक्तं स्थानकं स्याच्चतुर्भुजम् ॥

यानमष्टभुजे कुर्यात् स्थापनं परिवारके ।
स्कन्दं पद्मगजारूढमुपवीतसमन्वितम् ॥

दाडिमीपुष्पसङ्काशं सर्वाभरणभूषितम् ।
सर्वलक्षणसंयुक्तं पूर्वोक्तेन विधानतः ॥

विद्यामेधा च सहिते शुक्लश्यामनिभे तथा ।
सर्वालङ्कारसंयुक्ते द्विभुजे पद्मधारिके ॥

(सुप्रभेदागमे चतुश्चत्वारिंशत्तमपटले ॥)

चतुर्भुजं द्विबाहुं च शान्तं सिद्धिप्रदं स्मृतम् ।
द्विभुजश्च चतुर्बाहुष्षड्भुजोऽष्टभुजः पुनः ॥

द्विषड्भुजः पञ्च भेदा एतेषां लक्षणं शृणु ।
द्विहस्ते पञ्चभेदोऽस्ति कटिबद्धाभयं तु वा ॥

पद्मधृक् सक(?)बद्धं वा दण्डेन कटिबद्धकम् ।
शक्तिवज्रधरं वापि शक्तिकुक्कुटमेव च ॥

चतुर्भुजस्सप्तभेदं वज्रशक्तिवराभयम् ।
अभयं वरदं पश्चादक्षमालाकमण्डलुम् ॥

ततो वै कुण्डि अक्षस्रुक् कटिबन्धाभयान्वितम् ।
पश्चादभीतिवरदं शक्तिकुक्कुटसंयुतम् ॥

ततोऽभयं च शक्तिं च कुक्कुटं चाक्षमालिकाम् ।
शक्तिं कमण्डलुं पश्चात् कटिबद्धाभयं तु वा ॥

पश्चात् कुक्कुटशक्तिभ्यामसिखेटसमायुतम् ।
षड्भुजे त्वभयं खड्गं शक्तिं दक्षिणपाणिषु ॥

खेटकं चाक्षमालां च कुक्कुटं वामपाणिषु ।
अष्टबाहुं ततो वक्ष्ये वराभीवज्रशक्तयः ॥

खड्गखेटशरं चापं द्विषड्भुजमथ शृणु ।
द्विषड्भुजेति(पि ?)षड्भेदं तत्तद्भेदं वदाम्यहम् ॥

सव्ये शक्तिशरं खड्गध्वजं चैव गदाभयम् ।
वामे वज्रं धनुः खेटं पद्मं शूलं वरं पुनः ॥

शक्तिं बाणं च खड्गं च चक्रं पाशं प्रसारितम् ।
सव्ये वामेऽपि चक्रं च शङ्खं वै कुक्कुटं ततः ॥

धनुर्दण्डं हलं चैव विश्वामित्रमहामुने ! ।
शक्तिं च मुसलं खड्गं चक्रं पाशं तथाभयम् ॥

वज्रं धनुर्ध्वजं खेटमङ्कुशं वरदं तु वा ।
शक्तिं खड्गं ध्वजं पद्मं कुक्कुटं प्रासदण्डके ॥

वराभयधनुर्बाणं टङ्कमेतैर्युतं तु वा ।
वज्रं शक्तिं च दण्डं च चक्रं पाशाङ्कुशं गदाम् ॥

शूलं च चक्रपद्मे च वरदाभयसंयुतम् ।
शक्तिं चर्ममसिं शूलं विशिखाभीतिकार्मुकम् ॥
चक्रं पाशं कुक्कुटं च वरदं द्वादशैः करैः ।
दधानं षण्मुखं शान्तं प्रतिवक्त्रं त्रिलोचनम् ॥
एवं विधानं षड्वक्त्रमेकास्यं वाथ कल्पयेत् ।
कुङ्कुमाभं द्वादशाक्षं सर्वाभरणभूषितम् ॥
आसनं स्थानकं वापि घ्यानकं(यानकं?) त्रिविधं स्मृतम् ।
आसनं द्विभुजं प्रोक्तं स्थानकं तु चतुर्भुजम् ॥
द्विषड्भुजं चाष्टबाहुं षड्बाहुं घ्यान(यान?)रूपकम् ।
योगं भोगं च यानं च बेरं तु त्रिविधं पुनः ॥
आसनं योगबेरं स्यात् स्थानकं भोगबेरकम् ।
घ्या(या?)नकं यानबेरं स्यान्नागरादिक्रमं तथा ॥
सात्विकं द्विभुजं बेरं राजसं स्याच्चतुर्भुजम् ।
तामसं द्वादशभुजमेतं स्यादर्चनाविधौ ॥
पीतं वा रक्तवर्णं वा श्यामवर्णमथापि वा ।
स्कन्दं पद्मासनस्थं वा मयूरारूढमेव वा ॥
गजेन्द्रयानकं वापि शक्त्येकासहितं तु वा ।
शक्तिं विनापि कर्तव्यं सोपवीतं सुयौवनम् ॥
शत(छन्न?)वीरसमायुक्तं पादनूपुरसंयुतम् ।
पत्रकर्णयुतं कान्तं नानाकुण्डलकं तु वा ॥

मन्दस्मितं बालवेषं शोभनाङ्गं शुभेक्षणम् ।
करण्डमकुटोपेतं सर्वलक्षणसंयुतम् ॥

शक्तिद्वययुतं वापि शक्त्यैकसहितं तु वा ।
शक्तिं विनापि कर्तव्यं योगबेरं तदीरितम् ॥

देव्योरुत्सेधमद्यैव शृणु कौशिक सुव्रत ! ।
कर्णान्तं वाथ(वास्य ?)सीमान्तं हन्वन्तं बाहुतुङ्गकम् ॥

हिक्कान्तं वा स्तनान्तं वा कल्पयेदुत्तमानि च ।
मध्यमंदशतालेन देव्यौ च परिकल्पयेत् ॥

महावल्ल्याकृतिं वक्ष्ये श्याममन्दस्मिताननम् ।
स्थितं वै सव्यपादं तु वामपादं तु कुञ्चितम् ॥

पद्मधृग्वामहस्तं च सव्यहस्तं प्रलम्बितम् ।
देवसेनाकृतिं वक्ष्ये रक्तं मन्दस्मिताननम् ॥

स्थितं वै वामपादं तु दक्षपादं तु कुञ्चितम् ।
उत्पलं सव्यहस्तं च वामहस्तं प्रलम्बितम् ॥

(कुमारतन्त्रागमे चतुर्विंशतितमपटले ॥)

विलिखेत् षण्मुखं देवं मयूरवरवाहनम् ।
तरुणादित्यसङ्काशं बालभूषणभूषितम् ॥

स्थानीये खेटके वापि कुमारो लिख्यते यदा ।
भुजान् द्वादश कुर्वीत खर्वटे चतुरो भुजान् ॥

ग्रामे वने द्विबाहुस्स्यात्लेखनीयो विचक्षणैः ।

(शिल्परत्ने पञ्चविंशपटले ॥)

स्कन्दः कुमाररूपश्शक्तिधरो बर्हिकेतुश्च ।

(बृहत्संहितायामष्टापञ्चाशत्तमाध्याये ॥)

कुमारष्षण्मुखः कार्यश्शिखण्डकविभूषणः ।
रक्ताम्बरधरः कार्यो मयूरवरवाहनः ॥
कुक्कुटश्च तथा घण्टा तस्य दक्षिणहस्तयोः ।
पताका वैजयन्ती च शक्तिः कार्या च वामयोः ॥

(विष्णुधर्मोत्तरे ॥)

रक्ताम्बरसदृक्(सुदृक् ?) स्तोकबालो बालार्कसन्निभः ।
शिखण्डमणिको ग्रीवमांसलः प्रियदर्शनः ॥

शक्तिस्तु विलसत्खड्गचक्रपाशप्रसारितः ।
दक्षिणेऽदक्षिणे रक्तचूडखेटककार्मुकः ॥

पताका पिञ्छिकामुष्टिस्तर्जनी च प्रसारिता ।
गुहो द्वादशबाहुस्स्यात्पुरीखेटकपत्तने ॥

चतुर्दोर्भिर्वाथ षड्दोर्भिस्संयुक्तं परिकल्पयेत् ।
सशक्तिस्सहय(साभयः ?)स्सासिस्साक्षमालस्सकुक्कुटः ॥

सखेटश्च सषड्बाहुश्चतुर्दोस्स्वस्ति(सासि ?)खेटकः ।
सशक्तिकुक्कुटस्स्वे(स्त्वे ?)कवक्त्रकः कुङ्कुमच्छविः ॥

मयूरारोहसर्वत्र भ्रामराद्यद्विबाहुकः(?) ।
वासिकाबद्धमकुटस्सुब्रह्मण्यस्सुसुन्दरः ॥

स्कन्दस्याकृतिरेवं तु आर्यस्याकृतिरुच्यते ।

(पूर्वकारणागमे त्रयोदशपटले ॥)

शक्तिधरः ।

एकास्यं द्विभुजं वामे वज्रं दक्षिणजे करे ।

इच्छाज्ञानक्रियाशक्तिरूपं शक्तिधरं भजे ॥

(कुमारतन्त्रागमे द्वितीयपटले ॥)

ज्ञानशक्तिसुब्रह्मण्यः ।

एकवक्त्रं द्विनेत्रं च जटामकुटसंयुतम् ।

श्वेतार्कपुष्पमालं च हेमरत्नकिरीटिनम् ॥

चतुर्भुजैर्वज्रशक्तिकुक्कुटाभयधारिणम् ।

दिव्यगन्धानुलिप्ताङ्गं शुक्लयज्ञोपवीतिनम् ॥

शिवशक्तिज्ञानयोगं ज्ञानशक्तिस्वरूपकम् ।

श्वेतवर्णः ॥

(श्रीतत्वनिधौ ॥)

स्कन्दः ।

कल्पद्रुमं प्रणमतां कमलारुणाभं

स्कन्दं भुजद्वयमनामयमेकवक्त्रम् ।

कात्यायनीसुतमहं कटिबद्धदाम[१]-

कौपीनदण्डधरदक्षिणहस्तमीडे ॥

(कुमारतन्त्रागमे द्वितीयपटले ॥)

---

१ 'वामहस्तं च' इति श्रीतत्वनिधिपाठः । 'वाम'मिति मानसारपाठः ।

स्कन्दसुब्रह्मण्यः ।

चतुर्भुजं द्विनेत्रं च श्वेतपद्मासनस्थितम् ।
कुक्कुटाभयवज्राणि दधतं वरदं करे ॥

किंचित्केशशिखाबद्धपुष्पमालाभिरावृतम् ।
मेखलाम्बरसंवीतं रत्नभूषणभूषितम् ॥

धूम्रवर्णप्रभं स्कन्दं प्रभामण्डलमण्डितम् ।
स्कन्दरूपमिदं प्रोक्तम्.............. ॥ धूम्रवर्णः ।

(श्रीतत्वनिधौ ॥)

सेनापतिः ।

नौम्यादित्यप्रदीप्तं द्विदशनयनकं षण्मुखं मन्दहासं
वामाङ्के सुस्थितायास्सरसिरुहधृतालिङ्गितायाः प्रियायाः ।
उत्तुङ्गोरुस्तनाग्रे विहित [1]करतलभीतिखेटा[2]दिशूल-
ह्रादिन्युद्दीप्तशक्तीष्वसनघन(?)गदाकुक्कुटाब्जेषुहस्तम् ॥

(कुमारतन्त्रागमे द्वितीयपटले ॥)

एकवक्त्रं द्विनयनं शङ्खचक्रवराभयान् ।
सर्वाभरणसंयुक्तं दिव्यगन्धानुलेपनम् ॥

श्यामवर्णं प्रभुं चैव शुक्लयज्ञोपवीतिनम् ।
सुस्मितं चारुवदनं देवसेनापतिं भजे ॥

श्यामवर्णः ।

(श्रीतत्वनिधौ ॥)

---

१ 'करतलोऽभीती'ति मानसारपाठः । २ 'खेटासिशूलाद्यादीप्तादीप्तशक्तिः स हरतु दुरितं कुक्कुटाब्जस्य युक्ता' इति मानसारपाठः ।

सुब्रह्मण्यः ।

सिन्दूरारुणमिन्दुकान्तिवदनं केयूरहारादिभि-
दिव्यैराभरणैर्विभूषिततनुं स्वर्गादिसौख्यप्रदम् ।
अम्भोजाभयशक्तिकुक्कुटधरं रक्ताङ्गरागांशुकं
सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्यतम् ॥

अन्यच्च

एकवक्त्रं द्विदोर्दण्डं कटिबद्धाभयान्वितम् ।
तरुणारुणसङ्काशं सुब्रह्मण्यमुपास्महे ॥

(कुमारतन्त्रागमे द्वितीयपटले ॥)

गजवाहनः ।

एकाननं द्विनयनं वरकुक्कुटौ च
वामद्वये निशितशक्त्यभयद्वयं च ।
बिभ्राणमीश्वरसुतं तपनायुताभं
नित्यं नमामि गजवाहनमिष्टसिद्ध्यै ॥

(कुमारतन्त्रे द्वितीयपटले ॥)

शरवणभवः[१] ।

शक्तिं घण्टां ध्वजसरसिजे कुक्कुटं पाशदण्डौ
टङ्कं बाणं वरदमभयं कार्मुकं चोद्वहन्तम् ।
पीतं सौम्यं द्विदशनयनं देवसङ्घैरुपास्यं
सद्भिः पूज्यं शरवणभवं षण्मुखं भावयामि ॥

(कुमारतन्त्रागमे द्वितीयपटले ॥)

---

१. मानसारे खेटकृपाणयोरधिकतया, पाशस्थाने प्रासस्य च वर्णनमस्ति ।

षड्भुजं चैकवदनं बालसूर्यसमप्रभम् ।
सर्वाभरणसंयुक्तं सिंहस्थं दधतं भजे ॥
त्रिनेत्रं भसितोद्धूलं पुष्पबाणेक्षुकार्मुकम् ।
खड्गं खेटं च वज्रं च कुक्कुटध्वजधारिणम् ॥
शरजन्म समाख्यातं ॥ रक्तवर्णः ।

(श्रीतत्वनिधौ ॥)

कार्तिकेयः ।

वरदकुलिशखेटं वामहस्तत्रये च
दधतमभयशक्तिं खड्गमन्यत्त्रये च ।
तरुणरविसमाभं साधुभिः पूज्यमानं
कमलवदनषट्कं कार्त्तिकेयं नमामि ॥

(कुमारतन्त्रागमे द्वितीयपटले ॥)

त्रिनेत्रं दशहस्तं च मस्तके बिल्वधारिणम् ।
शक्तिं शूलं तथा चक्रमङ्कुशाभयमन्यके ॥
वरदं तोमरं पाशं शङ्खं वज्रं च वामके ।
मयूरवाहनारूढं सर्वाभरणभूषितम् ॥
बालसूर्यप्रतीकाशं कार्तिकेयं शिवात्मजम् ।
रक्तवर्णः ।

(श्रीतत्वनिधौ ॥)

कुमारः ।

सव्यद्वये निशितशक्त्यसिमादधानं
वामद्वयेऽभिमतकुक्कुटखेटकं त्वाम्[१] ।
वल्लीपतिं विबुधलोचनपूर्णचन्द्रं
कल्याणदाननिरतं कलये कुमारम् ॥

(कुमारतन्त्रागमे द्वितीयपटले ॥)

चतुर्भुजं चैकवक्त्रं करण्डमकुटान्वितम् ।
शक्तिं चाभयदं दक्षे सव्ये वरदवज्रके ॥
पद्मपुष्पं धरं कण्ठे देवं बालस्वरूपकम् ।
रक्तवर्णः ।

(श्रीतत्त्वनिधौ ॥)

षण्मुखः ।

वन्दे सिन्दूरकान्तिं शरविपिनभवं श्रीमयूराधिरूढं
षड्वक्त्रं देवसैन्यं मधुरिपुतनयावल्लभं द्वादशाक्षम् ।
शक्तिं बाणं कृपाणं ध्वजमपि च गदां चाभयं सव्यहस्ते
चापं वज्रं सरोजं कटकमपि वरं शूलमन्यैर्दधानम् ॥

(कुमारतन्त्रागमे द्वितीयपटले ॥)

शक्तिं शरं च खड्गं च चक्रं पाशाभयौ तथा ।
कुक्कुटं च धनुः खेटं शङ्खं[२] धत्ते हलं वरम् ॥

---

१ 'हरितकुक्कुटखेटकं चे'ति मानसारपाठः । २ मानसारे शङ्खहलयोस्स्थाने कुलिशाङ्कुशयोः पाठः दृश्यते ।

मयूरवाहनोपेतं सर्वलक्षणसंयुतम् ।
जया[1] च विजया चैव वामदक्षिणपार्श्वयोः ॥

सर्वालङ्कारसंयुक्तं सर्वाभरणभूषितम् ।
षण्मुखं चेति विख्यातं............ ॥
रक्तवर्णः ।

(श्रीतत्वनिधौ)

तारकारिः ।

वरदमङ्कुशध्वजे च कटकौ चापवज्र-
मभयपाशचक्रखड्गमुसलशक्तिमन्वहम् ।
द्विदशपाणिभिर्दधानमरुणकोटिसन्निभं
भजत तारकारिमत्र भवविनाशकारणम् ॥

(कुमारतन्त्रागमे द्वितीयपटले ॥)

एकवक्त्रं त्रिनयनं गजपृष्ठोपरि स्थितम् ।
षण्मुखं चाभयं खड्गं शक्तिं वामेतरे दधम् ॥

खेटकं चाक्षमालां च कुक्कुटं वामहस्तके ।
तारकारिं भजे ख्यातम्.............. ॥
रक्तवर्णः ।

(श्रीतत्वनिधौ ॥)

---

१ 'गजाम्बया च वल्ल्या चे'ति मानसारपाठः ।

सेनानीः ।

अभयमसिरथाङ्गं[1] चाङ्कुशं शक्तिशूलं
वरदकुलिशपाशं पद्मदण्डौ गदां च ।
दधतमुभयपक्षद्वादशायामहस्तै-
र्द्विदशकमलनेत्रं देवसेनान्यमीडे ॥

ब्रह्मशास्ता ।

वामे करे च युगले करकुण्डिके च
सव्येऽक्षसूत्रमभयं दधतं विशाखम् ।
वल्ल्या युतं वनजलोचनमेकवक्त्रं
वन्दामहे वनजसंभवशासितारम् ॥

वल्लीकल्याणसुन्दरः ।

हस्तद्वन्द्वेऽक्षमालामभयमपि धृतं कुण्डिकां श्रोणिबन्धं
सव्ये वामे निषण्णस्त्रुवधृतविधिना हूयमानेन युक्तम् ।
सर्वालङ्कारयुक्तं जलकलशधृता विष्णुना चारुणाभं
वल्लीकल्याणमूर्तिं सकलसुरगणैस्तूयमानं प्रपद्ये ॥

बालस्वामी ।

पद्मसव्यकटिसंयुतवामं पद्मकान्तिनिभमेकमुखं च ।
बालवृद्धिकरमीश्वरसूनुं बालमुन्नतभुजं प्रणतोऽस्मि ॥

---

१ मानसारे 'असिरथाङ्गशूलपाशानां स्थाने वरदोभयशक्तिचापाः' पठ्यन्ते ॥

अन्यच्च,

एकवक्त्रं द्विनयनं पद्मद्वयकरद्वयम् ।
प्रियप्रियकरं वन्दे बालरूपं रविप्रभम् ॥

क्रौञ्चभेत्ता ।

अभयशितकृपाणौ[1] शक्तिबाणौ च सव्ये
वरदकुलिशचापं खेटकं चान्यहस्ते ।
दधतममरसेनानायकं चाष्टबाहुं
कमलवदनषट्कं क्रौञ्चभेत्तारमीडे ॥
(कुमारतन्त्रागमे द्वितीयपटले ॥)

चतुर्भुजं त्रिनेत्रं च स्थितं सिंहासनोपरि ।
वरदाभयसंयुक्तपुष्पबाणेक्षुकार्मुकम् ॥
मयूरवाहनारूढं नमस्ये रक्षणोन्मुखम् ।
क्रौञ्चभेदकरद्वन्द्वं क्रौञ्चभेदिस्वरूपकम् ॥
रक्तवर्णः ।
(श्रीतत्वनिधौ ॥)

शिखिवाहः ।

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिम् ।
देवलोकरिपुघ्नमविघ्नदं नौमि[2] रुद्रभवं शिखिवाहम् ॥
दाडिमीपुष्पसंकाशं गुञ्जाभं कुङ्कुमाकृतिम् ।
षड्वक्त्रसहितं देवं द्वादशाक्षं सुयौवनम् ॥

---

१ 'मसिधराङ्ग' मिति मानसारपाठः । २ 'युग्मशक्तिशिखिवाहनं गुहम्' इति मानसारपाठः ।

चतुर्भुजमुदाराङ्गं यज्ञसूत्रेण संयुतम् ।
वरदाभयसंयुक्तं कमण्डल्वक्षधारिणम् ॥
नक्रकुण्डलसंयुक्तं करण्डमकुटोज्वलम् ।
हारकेयूरकटककटिसूत्रैर्विभूषितम् ॥
रत्नविद्रुमभूषाढ्यं नव(छन्न ?)वीरसमायुतम् ।
पादनूपुरसंयुक्तं सर्वाभरणभूषितम् ॥
सर्वलक्षणसंयुक्तं कुमारं शङ्करात्मजम् ।
महावल्लीदेवसेनायुक्तं सुरगणप्रियम् ॥
इत्थं रूपं यजेन्नित्यं सर्वलोकहितावहम् ।
चतुर्भुजं बालवेषं स्कन्दं कनकसप्रभम् ॥
शक्तिकुक्कुटहस्तं च वरदाभयसंयुतम् ।
विद्रुमनिभ द्विदशहस्त रविनेत्र शक्तिशरखड्गमभयध्वजगदां च ।
वामकरचापकुलिशाब्जवरशूलखेटधरसव्यकर षण्मुख! नमस्ते ॥

षड्वक्त्रं शिखिवाहनं त्रिनयनं रक्ताम्बरालङ्कृतं
शक्तिं चर्म च खड्गशूलविशिखाभीतिं धनुश्चक्रकम् ।
पाशं कुक्कुटमङ्कुशं च वरदं दोर्भिर्दधानं तथा
ध्यायेदीप्सितसिद्धिदं शशिधरं स्कन्दं सुराराधितम् ॥
लोकालोकान्धकारप्रतिहतकिरणैर्भानुकोटिप्रकाशं
भूमिन्यस्तैककोटीध्वसनमपि शरं लम्बमानोर्ध्वकायम् ।
हस्ताभ्यां चेतराभ्यां धृतमथ कुलिशं शक्तिमम्भोरुहाक्षं
सर्वालङ्कारयुक्तं भजत सुरपुरीपालकं बाहुलेयम् ॥

(कुमारतन्त्रागमे द्वितीयपटले ॥)

चतुर्भुजं चैकवक्त्रं त्रिनेत्रमभयं वरम् ।
पाशाङ्कुशदधं चैव ज्वालाकेशशिखण्डकम् ॥
इन्द्रनीलरथारूढं रक्तोत्पलसमप्रभम् ।
चतुर्दशादिभवनं शिखिवाहनमाचरेत् ॥
रक्तवर्णः ।

अग्निजातसुब्रह्मण्यः ।

द्विमुखं चाष्टबाहुं च श्वेतं वा श्यामकन्धरम् ।
स्रुवाक्षमालां खड्गं च स्वस्तिकं दक्षिणे करे ॥
कुक्कुटं खेटकं वज्रमाज्यपात्रं तु वामके ।
अग्निहोत्रविधिं देवमग्निजातस्वरूपकम् ॥
नीलवर्णः । (?)

सौरभेयसुब्रह्मण्यः ।

चतुर्वक्त्राष्टनयनं भुजाष्टकमलासनम् ।
कुञ्चितं वामपादं च सुस्थितं दक्षिणं पदम् ॥
शक्त्युत्पले पुष्पबाणमभयं दक्षिणे करे ।
वज्रं चेक्षुधनुश्शूलं वरदं वामके दधम् ॥
पद्मपुष्पनिभं चैव सौरभेयस्वरूपकम् ।
पाटलवर्णः ।

गाङ्गेयसुब्रह्मण्यः ।

एकवक्त्रं त्रिनयनं दाडिमीकुसुमप्रभम् ।
करण्डमकुटोपेतं कुक्कुटध्वजधारिणम् ॥
नीलोत्पलधरं वन्दे मकरारूढमव्ययम् ।
परशुं पूर्णकुम्भं च सव्यहस्ते तु धारिणम् ॥
अरणिं कुक्कुटं वामे गाङ्गेयसमरूपकम् ।
पाटलवर्णः ।

गुहसुब्रह्मण्यः ।

चतुर्भुजं त्रिनेत्रं च हेमरत्नकिरीटिनम् ।
शूलं वज्रं धरं सव्ये वराभयकमन्यके ॥
श्वेतवस्त्रधरं देवं सर्वेषां रक्षणोन्मुखम् ।
जायया वामपार्श्वे तु कल्याणोत्सवविग्रहम् ॥
पादाम्बुजं हृदि ध्यात्वा गुहरूपं समाश्रये ।
श्यामवर्णः ।

ब्रह्मचारिसुब्रह्मण्यः ।

द्विनेत्रं द्विभुजं चैव बालसूर्यधरं प्रभुम् ।
दक्षभागे दण्डहस्तं वज्रवामोरुहस्तकम् ॥
सव्यापसव्यपादं तु स्थितं वा कुञ्चितं तु वा ।
शिखायज्ञोपवीताढ्यं मौञ्जीकौपीनसंयुतम् ॥

मेखलोपरिवङ्याणं रक्तपद्मोपरि स्थितम् ।
दिव्यरूपधरं देवं ब्रह्मचारिणमाश्रये ॥

रक्तवर्णः ।

देशिकसुब्रह्मण्यः ।

षड्भुजं चैकवदनं करण्डमकुटान्वितम् ।
शक्तिहस्तद्वयं चैव जपमालाधरं शुभम् ॥

मयूरवाहनारूढं वराभयकराम्बुजम् ।
इत्येवं विधिवद् ध्यायेच्छिवदेवस्य देशिकम् ॥

रक्तवर्णः ।

(श्रीतत्वनिधौ ॥)

सुब्रह्मण्यद्वारपालकौ ।

सुदेहसुमुखौ विप्रौ गुहस्य द्वारपालकौ ।
एकवक्त्रौ द्विबाहू च गदाभयकरौ स्मृतौ ॥

चतुर्भुजौ चेत्तस्योर्ध्वे वज्रशक्तिधरौ तथा ।
रक्तश्यामलवर्णाढ्यौ सर्वाभरणभूषितौ ॥

सुदंष्ट्रौ स्मितवक्त्रौ च करण्डमकुटोज्वलौ ।
दक्षिणे तु सुदेहं च सुमुखं च तथोत्तरे ॥

(कुमारतन्त्रागमे पञ्चमपटले ॥)

सुमित्रः ।

सुमित्रस्थापनं वक्ष्ये शृणु कौशिक सुव्रत! ।
उक्त्वैव जननं पूर्वे(र्वं?) प्रतिष्ठां च ततः परम् ॥

वसिष्ठगोत्रः स्वर्णाक्षपुत्रः काशीपुरे वसन् ।
त्रिजन्मसु पुरा स्कन्दं समभ्यर्च्य यथाविधि ॥

सुमित्र इति सेनान्या प्रोक्तः प्रीतेन देवलः ।
सुब्रह्मण्यस्य सामीप्ये गाणपत्यमवाप्तवान् ॥

उत्तमंनवतालेन सुमित्रं कारयेद् बुधः ।
द्विनेत्रं द्विभुजं रक्तं सुवर्कं च सुयौवनम् ॥

दक्षिणे शक्तिहस्तं च वामं च कटिबन्धनम् ।
अलकं ज्योतिसंयुक्तं दंष्ट्रिणं रुचिराननम् ॥

करण्डमकुटं वापि जटामकुटमेव वा ।
हस्तौ मुकुलवद् बद्धौ दक्षिणं शक्तिसंयुतम् ॥

सर्वाभरणसंयुक्तमासनं स्थानकं तु वा ।
यज्ञोपवीतसंयुक्तं पद्मपीठोपरि स्थितम् ॥

इत्थं रूपं सुमित्रस्य गुहेन विहितं पुरा ।

(कुमारतन्त्रागमे द्विचत्वारिंशत्तमपटले ॥)

नन्द्यादयः ।

नन्द्यादयः ।

नन्दी ।

नन्दी कार्यस्त्रिनेत्रस्तु चतुर्बाहुर्महाभुजः ।
सिन्दूरारुणसङ्काशो व्याघ्रचर्मपरिच्छदः ॥
त्रिशूलभिन्दिपालौ च करयोस्तस्य कारयेत् ।
शिरोगतं तृतीयं तु तर्जयन्तं तथापरम् ॥
आलोकयानं कर्तव्यं दूरादागामिनं जनम् ।

(विष्णुधर्मोत्तरे ॥)

बिभाणं परशुं मृगं करतले ईशप्रमाणाञ्जलिं
भस्मोद्धूलितपाण्डुरं शशिकलागंगाकपर्दोज्ज्वलं ।
परियायत्रिपुरान्तकं प्रथमतः श्रेष्ठं गणैर्वन्दितं
ब्रह्मेन्द्राच्युतपूजिताङ्घ्रिकमलं श्रीनन्दिकेशं भजे ॥

चण्डेशः ।

चण्डेशस्थापनं वक्ष्ये तल्लक्षणपुरस्सरम् ।
परस्वतन्त्रभेदेन द्विविधं तच्च संमतम् ॥
पुरादौ मध्यमे वाष्टदिक्षु चण्डेश्वरालयः ।
धामेशानेऽथ सौम्ये वा सोमेशेन्द्रान्तरेऽथवा ॥

अन्तमण्डलदेशे[1]ऽन्तर्हारायां वेष्टशालके ।
अथैकादित्रयस्त्रिंशद्धस्तविस्तारसंयुतः ॥
धामलक्षणसंसिद्धधामेनापि समन्वितः ।
एकादिसप्तभूम्यन्तं भूमिभागसमन्वितः ॥
धामोक्ताकारसंयुक्तो दिक्षु चण्डेश्वरान्वितः ।
इष्टदेवान्वितो वा स्यात्केवलो वा वृषान्वितः ॥
प्रागुक्तविधिनानीतगर्भाद्येष्टकया युतः ।
मूर्धेष्टकासमायुक्तः स्थूपिस्थापनसंयुतः ॥
दक्षिणद्वारसंयुक्तः पराङ्मुखेन्मुनीश्वराः ! ।
स्वतन्त्रस्थापने दक्षपूर्वपश्चिमदिङ्मुखः ॥
दिङ्न्यस्तामरविन्यस्तमध्यकुम्भयुतेन च ।
धामसंस्थापनेनाढ्यः प्रागुक्तविधिना सह ॥
प्रागुक्तगर्भमानाद्यं सर्वमत्र प्रयोज्यताम् ।
प्राकारमण्डपोपेतः परितः परिवारयुक् ॥
रुद्रभक्तस्ततो रुद्रचण्डश्चण्डप एव च ।
महाबलस्तथाविर्य(वीर्य ?)टङ्कपाणीशसेवकौ[2] ॥
रुद्रकोपज इत्यष्टमूर्तयः परिवारगाः ।
एते श्वेता महाकायाः कृताञ्जलिपुटान्विताः ॥

---

१ 'अन्तर्मण्डलदशे' इति पाठान्तरम् । २ 'महाबलास्तथा विप्रा' इति पाठान्तरम् ।

सटङ्कास्तद्विहीना वा वीराद्यासनसंस्थिताः ।
कृत्तिवासोऽन्विता वाथ चण्डरूपधरास्तु वा ॥
इन्द्राद्या वा तदर्धे(र्धं?)तु पीठं वा पूर्वतो वृषः ।
बलिपीठादिपीठान्तं पूर्ववत्कल्पयेत्तु वा ॥
द्वारस्थौ द्वारपौ कार्यौ द्विकरौ दण्डधारकौ ।
चण्डानुगश्चण्डभृत्यौ[1](भृत्यो?) नेष्टौ वा देशिकाग्रजाः ! ॥
द्रव्यैश्शिलादिभिः कार्यः पूर्ववल्लक्षणान्वितः ।
मध्येन दशतालेन दशतालाधमेन वा ॥
प्रतिमालक्षणप्रोक्तमानेनायादिसंयुतः[2] ।
बद्धपद्मासनश्चण्डनाथो दुर्दर्शभीषणः ॥
व्यालयज्ञोपवीती च मुखोद्गीर्णमहानलः ।
करालकज्जलाभासो जटिलश्चन्द्रशेखरः ॥
चतुर्वक्त्रश्चतुर्बाहुश्चाक्षमालात्रिशूलवान् ।
टङ्कं कमण्डलुं वामे भानुरक्तार्कलोचनः ॥
अथवा शङ्खवर्णाभश्चतुर्बाहुस्त्रिलोचनः ।
चन्द्रार्धमण्डितः कृत्तिवासा वीरासनस्थितः ॥
पिनाकामोघबाणाभ्यां व्यग्रपाणितलद्वयः ।
वराभयप्रदानाभ्यामन्यत्र परिमण्डितः ॥

---

१ 'चण्डभृत्यौ' इति पाठान्तरम् । २ 'मानेनायदिसंयुतः' इति पाठान्तरम् ।

अथवा द्विभुजश्शुक्लवस्त्रस्त्र्यक्षोऽञ्जनप्रभः ।
जटामकुटयुक्तो वा तुलसीकृतमूर्धजः(?) ॥
स्थानको वासनस्थो वा शयितासव्यपादलः ।
सलम्बसव्यपादस्तु वामहस्तभु(स्तु ?)जानुगः ॥
वरहस्तोऽथवा स स्यादितरष्टङ्कसंयुतः ।
वामेतरकरष्टङ्कयुक्तोऽञ्जलिपुटोऽथवा ॥
शङ्करेक्षणसंपन्नश्शोकनम्रशिरास्तु वा ।
उत्कुटासनयुक शान्तो जटिलष्टङ्कधृक्करः ॥
एवं वा चण्डनाथस्तु कार्यस्त्विष्टासनान्वितः ।
अथवाभयटङ्काभ्यां पाशशूलद्वयेन तु ॥
चतुर्भुजस्तु वा कार्यश्शङ्कराज्ञानुपालकः ।
विशेषस्सिंहले देशे कश्चिदत्राभिधीयते ॥
कृतायाः(कृतेऽय ?)मष्टहस्तस्स्यात्त्रेतायां[1] षड्भुजो मतः ।
द्वापरे च चतुर्हस्तः कलौ तु द्विकरो मतः ॥
अन्यदेशे तु सर्वत्र विभागो नायमीरितः ।
अथवा चण्डनाथस्तु देव्या तु सहितो न वा ॥
सा देवी श्यामला हस्तद्वयाखिलविभूषिता ।
धर्मनील्याख्यया ख्याता धृतनीलोत्पला वरा ॥

---

[1] 'कृतयामि' ति पाठान्तरम् ।

एवमापाद्य बेरं तु मनुभिस्स्थापनं नयेत् ।

(उत्तरकामिकागमे पञ्चषष्टितमपटले ॥)

अथातस्संप्रवक्ष्यामि चण्डेशस्थापनं परम् ।
उद्भवं प्रथमं तस्य द्वितीयं स्थापनं क्रमात् ॥

रुद्रस्यैव तु रुद्रांशं तत्सर्वं चण्डनामतः ।
गणेशावरणे स्थित्वा दशांशेनायुतेन तु ॥

प्रचण्डादिर्विनिष्क्रान्ता पञ्चमूर्तिर्विधानतः ।
प्रचण्डचण्डः प्रथमं ततो विक्रान्तचण्डकः ॥

तृतीयो विभुचण्डस्तु वीरचण्डश्चतुर्थकः ।
एवं वै पञ्चचण्डेशाः पञ्चब्रह्मसमुद्भवाः ॥

कृतयुगाधिपत्यं तु प्रचण्डमिदमुच्यते ।
विक्रान्तचण्डनामा तु त्रेतायामधिपस्स्मृतः ॥

द्वापरे चाधिपत्यं हि विभुश्चण्डेश उच्यते ।
कलौ तु वीरचण्डेशस्त्वा(स्या?)धिपत्यं प्रकीर्तितम् ॥

एवं [वै] पञ्चभेदेन चण्डनाम विधीयते ।
आलयस्यैशदिग्भागे विमानं पूर्ववत्क्रमात् ॥

त्रिनेत्रं चतुर्भुजं वापि द्विनेत्रं द्विभुजं तु वा ।
भीमं जटासमायुक्तं सर्वाभरणभूषितम् ॥

अभयं शान्तदेहं(?) च पाशं वै परशुं तथा ।
द्विभुजं यदि कर्तुं चेच्छान्त(?)टङ्कयुतं तथा ॥
शुक्लयज्ञोपवीतं च शुक्लाम्बरधरं तथा ।
स्थानकं चासनं प्रोक्तं पूर्वोक्तविधिना ततः ॥

(सुप्रभेदागमे सप्तचत्वारिंशत्तमपटले ॥)

चण्डश्च चण्डेश्वरो रक्तश्वेतमिश्रश्च विस्तरः ।
द्विबाहुस्सजटाजूटशेखरः कर्णकुण्डलः ॥
धृतयज्ञोपवीतश्च शुक्लाम्बरधरश्शुचिः ।
सर्वभूषणसंभूष्यष्टङ्कपाणिरथापि वा ॥
अर्धचन्द्रासनासीनः पुष्पमालावलम्बितः ।
चण्डेशस्याकृतिर्ह्येवं क्षेत्रपालाकृतिं शृणु ॥

(पूर्वकारणागमे त्रयोदशपटले ॥)

शिवभक्ताः ।

वक्ष्यामि शिवभक्तानां प्रतिष्ठां भोगमोक्षदाम् ।
ब्राह्मणा क्षत्रिया वैश्याश्शूद्रा वा ह्यन्तरालजाः ॥
स्त्रियो वा गुरवश्चैषामभिषिक्तो नृपोऽथवा ।
शिवभक्तिसमोपेता जीवन्तो वा मृतास्तु वा ॥
तेषां प्रतिकृतिं कृत्वा प्रतिष्ठाप्य समर्चयेत् ।
स्वप्रधानं पराङ्गं च द्विविधं स्थापनं मतम् ॥

ग्रामादौ वा नदीतीरे पुष्करिण्यास्तटेऽपि वा ।
वने चोपवने वापि पर्वते वा मनोरमे ॥

स्थानेऽन्यत्र च कर्तव्यं स्वप्रधानस्य मन्दिरम् ।
देवालयान्तस्साल्यादौ तत्र कल्पितमन्दिरे ॥

परिवारसमोपेतं स्वप्रधानं प्रकीर्तितम् ।
देवालयादौ सर्वत्र मालिकामण्डपादिषु ॥

परिवारविहीनं यत्कल्पितं लक्षमिष्यते ।
तदर्थं शिवलिङ्गं वा प्रतिमा वा शिवस्य तु ॥

स्कन्दनन्द्यादिरूपं वा मृतप्रतिकृतिं तु वा ।
कुर्यादायादिसंयुक्तं शिलाद्यैरुक्तवस्तुभिः ॥

शैलं लोहं तथा वार्क्षं मृन्मयं मणिजं तु वा ।
अर्धचित्रमथाभासं पटादिपरिकल्पितम् ॥

लिङ्गं चेत्तद्विधानोक्त्या प्रतिमा च तथैव च ।
तदुक्ततालभेदेन[1] कर्तव्यं स्याद् द्विजोत्तमाः ! ॥

मृतप्रतिकृतिं चोक्तामष्टतालेन कारयेत् ।
आसीनं स्थानकं वापि वाहनारूढमेव वा ॥

आसने स्थानके वाथ पद्मसिंहासनं तु वा ।
अधस्तात्कल्पयेद्विद्वानुभयं वा विधीयताम् ॥

---

1 'तदुक्ततालभेदेने'ति पाठान्तरम् ।

यथेष्टासनयुक्तं वा समाश्रं वा यथाश्रकम् ।
आसनोन्मानविस्तारायामं तद्वदलंकृतिम् ॥

प्रतिमोक्तप्रकारेण प्रागुक्तविधिना नयेत् ।
शिखी वा बद्धकेशी वा मुण्डितो जटिलोऽथवा ॥

अभिषिक्तो नृपश्चेत्तु किरीटमकुटान्वितः ।
यथेष्टायुधयुक्तो वा नमस्कारयुतोऽथवा ॥

सर्वलक्षणसंपन्नस्सर्वाभरणभूषितः ।
गायका नृत्तयुक्ता वा पूजका वा यथेष्टकाः ॥

स्त्रियश्चेत्तस्यानुरूपेण[1] भूषणैरुपभूषिताः ।
एवं लक्षणमाख्यातं प्रतिष्ठाद्यं निगद्यते ॥

(उत्तरकामिकागमे षट्षष्टितमपटले ॥)

आर्य्यः ।

आर्य्यश्चतुर्भुजश्शान्तस्त्रिनेत्रः पद्मसंस्थितः ।
हिरण्यसदृशप्रख्यो दुकूलवसनान्वितः ॥

अभयवरदोपेतः खड्गखेटकधारितः ।
सुस्थितः पद्मपीठे तु आर्य्यमेवं प्रकल्पयेत् ॥

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

---

1 स्त्रियश्चेदित्यर्धमादर्शान्तरे नास्ति ।

अथातस्संप्रवक्ष्यामि शास्तृस्थापनमुत्तमम् ।
शास्ता सर्वस्य लोकस्य तस्माच्छास्तेति चोच्यते ॥

समुद्रमथने काले परिगृह्यामृतं तथा ।
हरिर्बभूव स्त्रीरूपा मोहिनीनाम नामतः ॥

तां मोहिनीमहं दृष्ट्वा संगतोऽस्मि कदाचन ।
जातस्तदा महाशास्ता मेध्याहाम्रवतीश्वराः ॥

द्विनेत्रं द्विभुजं कृत्वा सर्वाभरणभूषितम् ।
श्यामवर्णयुतं तेषां शुक्लयज्ञोपवीतिनम् ॥

श्वानकुक्कुटमेषाद्यैः क्रीडन्तं सर्वसिद्धिदम् ।
मदनावर्णनीदेवौ[1](व्यौ?) पीतौरस(नोरस?)समन्वितौ(ते?) ॥

सर्वाभरणसंयुक्तौ(क्ते?) पार्श्वयोर्विन्यसेत्ततः ।
वामे दमनकं[2] न्यस्त्वा तद्वेषं विकृतं स्मृतम् ॥

द्विभुजं दक्षिणे हस्ते चक्रदण्डमथेश्वरम् ।
फलपल्लवहस्तं च कुञ्चिताङ्घ्रिकरद्वयम् ॥

भूताकारं बृहत्कुक्षिं नीलालकविभूषितम् ।
शास्तुश्च लक्षणं प्रोक्तं स्थापनं शृणु तत्वतः ॥

(सुप्रभेदागमे त्रिपञ्चाशत्तमपटले ॥)

---

१ 'पनकापार्णिनौ देव्यौ' इति पाठान्तरम् । २ 'वामधे मनकं न्यस्ता' इति पाठान्तरम् ।

मोहिनीतनयश्शान्तो द्विबाहुश्श्यामसन्निभः ।
पीठालम्बितशायितौ वामदक्षिणपादकौ ॥

वामाङ्घ्रिजानुकोर्ध्वे तु वामहस्तं स्थितं कुरु ।
मण्डलीभूतदण्डाग्रो वज्रदण्डधरो युवा ॥

स्निग्धनीलाञ्जनाकीर्णकुन्दलीभूतभूध्वजः(न्तलीभूतमूर्धजः?) ।
गजवाहनकेतुस्स्याद्विलासी सविलासिनी ॥

नीलश्वेताश्ववृषभवाहनो वा चतुर्भुजः ।
रक्तचूडध्वजो वापि सर्वत्र परिकीर्तितः ॥

ज्ञानी योगासनासीनो वेदाध्यायी पवित्रकः ।
सोभयांसोपवीतस्स्यान्न्यूनावीरासनास्थितः ॥

लीलाविगीतभावी स्यात्सुर(ख?)भावी सुखासनः ।
वामोरूपरि विन्यस्त(स्ता?)वामपादतलेक्षणः ॥

आर्यस्याकृतिरेवं तु शक्रस्याकृतिरुच्यते ।

(पूर्वकारणागमे त्रयोदशपटले ॥)

क्षेत्रपालः ।

त्रिविधः क्षेत्रपालस्तु सात्विको राजसस्तमः ।
श्वेतं रक्तमथो कृष्णं सात्विकादिगुणं भवेत् ॥

द्विभुजं वा चतुर्बाहु शान्तं सात्विकमुच्यते ।
षड्बाहु चोग्रवदनमुग्रं स्याद्राजसं स्मृतम् ॥

तामसं चाष्टबाहुं च एते वै समपादकाः ।
स्थानकं पद्मपीठे तु भद्रपीठे तु वा यथा ॥

शूलं दक्षिणहस्ते तु कपालमितरे धृतम् ।
द्विभुजं ह्येवमाख्यातं चतुर्हस्तमथोच्यते ॥

परहस्ते तु सव्ये तु खड्गं घण्टां तदन्यके ।
अथवा पूर्वहस्ते तु अभयं वरदान्वितौ ॥

पूर्ववत्परहस्तौ द्वौ घण्टां वा वामहस्तके ।
सात्विकं ह्येवमाख्यातं राजसं शृणु सुव्रत ! ॥

शूलं खड्गं च घण्टां च दक्षिणे [तु॰] करत्रये ।
खेटकं च कपालं च नागं वा पाशवामके ॥

तामसे तु धनुर्बाणं दक्षिणेऽदक्षिणे धृतम् ।
शेषं राजसवत्ख्यातं रक्तकेशोर्ध्वमण्डलम् ॥

उग्रदृष्टिसमायुक्तं नानानागविभूषितम् ।
त्रिनेत्रं नग्नरूपं च क्षेत्रपालं प्रकल्पयेत् ॥

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

अथातस्संप्रवक्ष्यामि क्षेत्रेशस्य विधिक्रमम् ।
ईश्वरस्यायुतांशेन क्ष(क्षे !)त्रपालोद्भवं तथा ॥

ग्रामादावैशदिग्भागे लोकरक्षार्थकारणम् ।
प्रासादं प्रतिमां तत्र पूर्वोक्तविधिना तथा ॥

द्वारं तु पश्चिमे मुख्यं दक्षिणे मध्यमं स्मृतम् ।
कन्यसं चेन्द्रदिग्द्वारं प्रतिमालक्षणं ततः ॥

चतुर्भुजं त्रिनेत्रं वा षड्भुजं चाष्टहस्तकम् ।
सुदंष्ट्रं भैरवाकारं कृष्णवर्णं दिगम्बरम् ॥

सर्पयज्ञोपवीतं च शिरोमालाकरोटिकम् ।
ऊर्ध्वकेशं सुवृत्ताक्षं नागाभरणभूषितम् ॥

त्रिशूलं दक्षिणे हस्ते वामहस्ते कपालकम् ।
खड्गं च दक्षिणे हस्ते वामहस्ते तु खेटकम् ॥

एवं चतुर्भुजं विद्धि षड्भुजं च ततः शृणु ।
नागं च दक्षिणे पाणौ तोमरं वामहस्तके ॥

प्रागुक्तायुधसंयुक्तं षड्भुजं त्विति कीर्तितम् ।
शूलं डमरुखट्वाङ्गं दक्षिणे वामहस्तके ॥

एवमष्टभुजं प्रोक्तं षड्भुजायुधसन्निभम् ।

(सुप्रभेदागमे पञ्चाशत्तमपटले ॥)

रक्तोप्रेक्षणः कालमेघवर्णो वापि महाबली ।
द्विबाहुर्वा चतुर्बाहुरष्टबाहुरथापि वा ॥

कपालशूलो द्विभुजो घण्टापाशसमायुतः ।
चतुर्बाहुः क्रमात्क्षेत्रपालो वामे च दक्षिणे ॥

अग्निटङ्कौ च खट्वाङ्गं भयमष्टभुजे क्रमात् ।
रक्तपद्मासनारूढः श्यामवर्णोग्ररूपकः ॥
विसृतोर्ध्वो(र्ध्व !) रक्तकेशः कुञ्चितभ्रूसविभ्रमः ।
नग्नरूप(पः !)शिरोमालाभूषितस्तीक्ष्णदंष्ट्रकः ॥
(पूर्वकारणागमे त्रयोदशपटले ॥)

ब्रह्मा ।

चतुर्भुजश्चतुर्वक्त्रो हरितालसमप्रभः ।
जटामकुटसंयुक्तः पिङ्गाक्षस्सर्वभूषणः ॥
कृष्णाजिनोत्तरीयश्च यज्ञसूत्रसमन्वितः ।
शुक्लवस्त्रधरश्शान्तः कटिसूत्रसमन्वितः ॥
शुक्लमाल्यानुलेपश्च कर्णकुण्डलमण्डितः ।
दक्षिणे चाक्षमाला च कूर्चं चैव तु धारयेत् ॥
कमण्डलुकुश(शं !) वामे दक्षिणे स्रुक्स्रुवौ तलः (!) ।
आज्यस्थालीं कुशांचैव(श्चैव !) वामहस्ते तु धारयेत् ॥
अभयवरदोपेतौ पूर्वहस्तौ द्विजोत्तम ! ।
आसने तूभयाङ्घ्रिं च शाययेत्तु ततः परम् ॥
मेढ्रमूलोपरिष्टात्तु वामहस्तोर्ध्ववक्त्रकम् ।
सव्यहस्तं च तस्योर्ध्वे तदन्यास्यं च कारयेत् ॥

दक्षिणे चाक्षमाला च वामहस्ते कमण्डलुम् ।
सरस्वती दक्षभागे सावित्री वामभागके ॥

आसीनो वा स्थितो वापि पद्मपीठोपरि स्थितः ।

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

चतर्मुखं चतुर्बाहुं कमण्डल्वक्षधारिणम् ।
रक्तवर्णजटायुक्तं कृत्वा ब्रह्माणमुज्वलम् ॥

सावित्रीं वामपार्श्वे तु सर्वालङ्कारसंयुताम् ।
एवं चतुर्मुखं कुर्याजगत्सृष्टिकरं शुभम् ॥

(सुप्रभेदागमे चतुस्त्रिंशत्तमपटले ॥)

लिखेच्चतुर्मुखं देवं चतुर्बाहुं शुभेक्षणम् ।
रत्नकुण्डलसंयुक्तं लम्बकूर्चोपरि स्थितम् ॥

कृष्णाजिनधरं गौरं शुक्लाम्बरविराजितम् ।
दक्षिणं वरदं हस्तं तत्रान्याशुभ (न्यंस्रुव?) धारिणम् ॥

कमण्डलुधरं वामं तथान्यं संयुतं शु(स्रु?)चा ।
बिभ्राणं चतुरो वेदान् पुरतश्चास्य विन्यसेत् ॥

वामे पार्श्वे तु सावित्री दक्षिणे तु सरस्वतीम् ।
आज्यस्थालीं पुरोभागे महिर्षीश्च(महर्षींश्च ?) समन्ततः ॥

हंसारूढं लिखेत्कापि क्वचिच्च कमलासनम् ।
स्रष्टारं सर्वलोकानां ब्रह्माणं परिकल्पयेत् ॥

(शिल्परत्ने पञ्चविंशपटले ॥)

ब्रह्मा कमण्डलुकरश्चतुर्मुखः पङ्कजासनस्थश्च ।

(बृहत्संहितायामष्टापञ्चाशत्तमाध्याये ॥)

ब्रह्माणं कारयेद्विद्वान् देवं सौम्यं चतुर्मुजम् ।
बद्धपद्मासनं तुष्टं तथा कृष्णाजिनाम्बरम् ॥

जटाधरं चतुर्बाहुं सप्तहंसरथस्थितम् ।
वामे न्यस्तेतरकरं तस्यैकं दोर्युगं भवेत् ॥

एत(क?)स्मिन् दक्षिणे पाणावक्षमाला तथा शुभा ।
कमण्डलुं द्वितीये च सर्वाभरणधारिणम् ॥

सर्वलक्षणयुक्तस्य शान्तिरूपस्य पार्थिव! ।
पद्मपत्रदलाग्राभं ध्यानसंमीलितेक्षणम् ॥

अर्चायां कारयेद्देवं चित्रे वा वास्तुकर्मणि ।

(विष्णुपुराणे ॥)

पद्मपत्रासनस्थश्च ब्रह्मा कार्यश्चतुर्मुखः ।
सावित्री तस्य कर्तव्या वामोत्सङ्गगता तथा ॥

(आदित्यपुराणे ॥)

ऋग्वेदादि प्रभेदेन कृतादियुगभेदतः ।
विप्रादिवर्णभेदेन चतुर्वक्त्रं चतुर्भुजं ॥
दक्षिणाधः करात्स्रष्टा जपमालां तथा स्रुचम् ।
पुस्तं कमण्डलुं धत्ते सकूर्चःकमलासनः ॥
अक्षसूत्रं पुस्तकं च धत्ते पद्मं कमण्डलुम् ।
चतुर्वक्त्रा तु सावित्री श्रोत्रियाणां गृहे हिता ॥

(रूपमण्डने ॥)

जटिलाः श्मश्रुलाः शान्ता आसीना ध्यानतत्पराः ।
कमण्डल्वक्षसूत्राभ्यां संयुक्ता ऋषयस्स्मृताः ॥
विश्वकर्मा चतुर्बाहुरक्षमालां च पुस्तकम् ।
कं वा(बुं?) कमण्डलुं धत्ते त्रिनेत्रो हंसवाहनः ॥
आग्नेय्यां तु गणेशस्स्यान्मातृस्थानं च दक्षिणे ।
नैऋत्ये तु सहस्राक्षं वारुण्यां जलशायिनम् ॥
वायव्ये पार्वतीरुद्रौ ग्रहांश्चैवोत्तरे न्यसेत् ।
ऐशान्ये कमलादेवीं प्राच्यां तु धरणीधरम् ॥

इति ब्रह्मायतनम् ।

ब्रह्मप्रतीहाराः ।

ब्रह्मणोऽष्टौ प्रतीहारान् कथयिष्याम्यनुक्रमात् ।
पु(प ?)रुषाकारगम्भीराः सकूर्चा मकुटोज्ज्वलाः ॥

पद्मं स्रुक्पुस्तकं दण्डं सत्यो वामेऽथ दक्षिणे ।
सव्यापसव्ये करके शेषं प्राग्वत्सधर्मकः ॥

अक्षं पद्मागमौ दण्डं करैर्धत्ते प्रियोद्भवः ।
दण्डागमस्रुक्फलकैर्यज्ञः स्यादायुधैः शुभैः ॥

अक्षसूत्रगदाखेटदण्डैर्विजयनामकः ।
अधोहस्तापसव्येन खेटकं यज्ञभद्रकः ॥

अक्षः पाशाङ्कुशौ दण्डो भवे स्यात्सार्वकामिकः ।
दण्डाङ्कुशपाशपद्मैर्विभवस्सर्वशान्तिदः ॥

इति ब्रह्मप्रतीहाराः ।

(रूपमण्डने ॥)

दिक्पालाः ।

दिक्पालाः ।

इन्द्रः ।

श्यामवर्ण(र्णं) द्विहस्तं च रक्ताम्बरधरं शुभम् ।
किरीटमकुटोपेतं सर्वाभरणभूषितम् ॥

शक्तिर्दक्षिणहस्ते तु वामहस्तेऽङ्कुशं धृतम् ।
विशालोदरग्रीवं च वामे शचीसमन्वितम् ॥

द्विनेत्रं सौम्यवदनं सिंहासनोपरि स्थितम् ।
आसीनं वा प्रकर्त्तव्यं गजारूढमथापि वा ॥

इन्द्रमेवं समाख्यातमश्विन्यौ च प्रवक्ष्यते ।

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

इन्द्रमैन्द्रे तु मतिमांस्त्विन्द्रो वज्राङ्कुशौधरात्[1] ।
श्यामाङ्गं तु गजारूढमप्सरोगणसंयुतम् ॥

(सुप्रभेदागमे अष्टचत्वारिंशत्तमपटले ॥)

सुरराजं प्रवक्ष्येऽहमैरावतसमाश्रितम् ।
किरीटकुण्डलधरं भुजद्वयसमन्वितम् ॥

---

१ 'वज्राङ्कुशौ दधत्' इति पाठान्तरम् ।

कुलिशं दक्षिणे पाणौ वामहस्ते तथोत्पलम् ।
दिव्यरत्नविभूषाढ्यं दिव्यचीनांशुकैर्युतम् ॥
चित्रचामरधारिण्यौ स्त्रियौ पार्श्वे प्रकल्पयेत् ।
सिंहासनस्थमथवा लिखेद् गन्धर्वसंयुतम् ॥
इन्द्राणीं वामतस्तस्य लिखेदुत्पलधारिणीम् ।
दिव्यशृङ्गारसंयुक्तामिन्द्रवक्त्रावलोकिनीम् ॥

(शिल्परत्नसंयोजिते कस्मिंश्चिद् ग्रन्थे ॥)

शुक्लश्चतुर्विषाणो द्विपो महेन्द्रस्य वज्रपाणित्वं च ।
तिर्यग्ललाटसंस्थं तृतीयमपि लोचनं चिह्नम् ॥

(बृहत्संहितायामष्टापञ्चाशत्तमाध्याये ॥)

चतुर्दन्ते गजे सक्तः श्वेतः कार्यस्सुरेश्वरः ।
वामोत्सङ्गगता कार्या तस्य भार्या शची नृप ! ॥
नीलवस्त्रा सुवर्णाभा सर्वाभरणवांस्तथा ।
तिर्यग्ललाटकस्तार्क्ष्यः(स्थाक्षः !) कर्तव्यश्च विभूषितः ॥
शक्रश्चतुर्भुजः कार्यो द्विभुजा च तथा शशी(ची !) ।
पद्माङ्कुशौ च कर्तव्यौ वामदक्षिणहस्तयोः ॥
वामं शचीपृष्ठगतं द्वितीयं वज्रसंयुतम् ।
वामे शच्याः करे कार्या रम्या सन्तानमञ्जरी ॥

दक्षिणं पृष्ठविन्यस्तं देवराजस्य कारयेत् ।

(विष्णुधर्मोत्तरे ॥)

वज्रपाणिर्महावीरस्सिंहस्कन्धोऽवलीलधृक् ।

ललाटोरस्स्थलायामपीवरोरुर्महोदरः ॥

प्रसन्नवदनश्श्यामवर्णो रक्ताम्बरस्सुखी ।

किरीटकुण्डली हारकेयूरादिविभूषितः ॥

पृथुशिरोगजारूढो देवराजश्शचीपतिः ।

शक्रस्याकृतिरेवं तु चण्डेशस्याकृतिं शृणु ॥

(पूर्वकारणागमे त्रयोदशपटले ॥)

वरं वराङ्कुशौ चैव कुण्डीं धत्ते करैस्तु यः ।

गजारूढः सहस्राक्ष इन्द्रः पूर्वदिशाधिपः ॥

(रूपमण्डने ॥)

वह्निः ।

वक्ष्मीह वह्निरूपं तु रक्तवर्णं चतुर्भुजम् ।

वरदाभयहस्तं च................ ॥

शक्तिस्स्यादपरे वामे दक्षिणे तु स्रुचं धरम् ।

एकाननं त्रिनेत्रं च रक्तकेशोर्ध्वमेव च ॥

वह्निरूपं समाख्यातमेवं धामनि विन्यसेत् ।

(सुप्रभेदागमे एकचत्वारिंशत्तमपटले ॥)

कृत्वा चाग्निमजारूढं रक्ताभं रक्तलोचनम् ।
शिखाभिरूर्ध्वगाभिश्च युक्ति(क्तं ?)शक्तिस्रुवं धरम् ॥

(सुप्रभेदागमे अष्टचत्वारिंशत्तमपटले ॥)

वह्नेस्स्वरूपं वक्ष्यामि शुद्धकाञ्चनसुप्रभम् ।
अर्धचन्द्रासनगतं रक्तवस्त्रविराजितम् ॥

लोहितं वा प्रकुर्वीत बालार्कसमतेजसम् ।
युक्तं यज्ञोपवीतेन लम्बकूर्चेन शोभितम् ॥

मेषपृष्ठस्थितं देवं भुजद्वयसमन्वितम् ।
दक्षिणे चाक्षसूत्रं स्यात् करे वामे कमण्डलुः ॥

स्वाहादेवी कृता पार्श्वे कुङ्कुमेन विलेपिता ।
अरुणैरम्बरैर्भव्या लक्ष्म्या मात्र (?) विभूषिता ॥

कुण्डस्थो वा प्रकर्तव्यो हव्यवाहो विचक्षणैः ।
ज्वालाभिस्सप्तशीर्षेण शोभमानो महाद्युतिः ॥

(शिल्परत्नसंयोजिते कस्मिंश्चिद् ग्रन्थे)

रक्तं जटाधरं वह्निं कारयेद्धूम्रवाससम् ।
ज्वालामालाकुलं सौम्यं त्रिनेत्रं श्मश्रुधारिणम् ॥

चतुर्बाहुं चतुर्दंष्ट्रं देवेशं वायुसारथिम् ।
चतुर्भिश्च शुकैर्युक्ते धूमाचिह्नरथे स्थितम् ॥

वामोत्सङ्गगता स्वाहा शक्रस्येव शची भवेत् ।
रत्नपात्रकरा देवी वह्नेर्दक्षिणहस्तयोः ॥
ज्वालात्रिशूले कर्तव्ये त्वक्षमाल्यं च वामके ।
(विष्णुधर्मोत्तरे ॥)

अर्धचन्द्रासनासीनो ब्रह्मरूपो हुताशनः ।
प्रज्वलत्काञ्चनज्योतिः पिङ्गलः पिङ्गलोचनः ॥
हेमकूर्चाग्रसदृशस्वरूपं च शिरोरुहम् ।
तरुणादित्यसंकाशं तद्वस्त्रमुपवीतकम् ॥
अक्षमाला च शक्तिश्च दक्षिणेऽदक्षिणेऽपि च ।
ज्वालामालाकुलं तीव्रं पार्श्वस्थान्य(स्थं ह्यं ?)शुमण्डलम् ॥
मेषारूढं च कुण्डस्थो योगपट्टेन वेष्टितम् ।
दक्षिणे तु स्थिता स्वाहा रत्नकुण्डलमण्डिता ॥
अग्नेराकृतिरेवं स्याच्छृणु वैवस्वताकृतिम् ।
(पूर्वकारणागमे चतुर्दशपटले ॥)

वरदः शक्तिहस्तश्च समृणालकमण्डलुः ।
ज्वालापुञ्जनिभो देवो मेषारूढो हुताशनः ॥
(रूपमण्डने ॥)

वैवस्वतः ।

द्विभुजः कृष्णवर्णस्तु खड्गखेटकधारिणी ।
करालदंष्ट्रवदनो रक्तमाल्यानुलेपनः ॥

रक्तवस्त्रधरोग्रश्च किरीटमकुटान्वितः ।
दीप्ताग्निसदृशाक्षश्च महामहिषवाहनः ॥

यमस्त्वेवं हि पार्श्वस्थौ तमिस्त्रौ चोग्रवक्त्रकौ ।
चित्रगुप्तः कलिश्चैव द्वारपार्श्वे तु संस्थितौ ॥

कृष्णश्यामनिभौ तौ च रक्तवस्त्रासिता(धरा ?) वुभौ ।
पीठपार्श्वस्थितौ मृत्युसहितादु(संहितौ व्यु ?)ग्रतेजसौ ॥

नीललोहितसङ्काशौ द्वौ चामरधृते स्त्रियौ ।
पुरतः संस्थितौ विप्रौ धर्माधर्मे समाह्वयौ[1] ॥

यमस्सिंहासनासीनो महिषारोहितस्तु वा ।
यमलक्षणमाख्यातं रोहिणीलक्षणं शृणु ॥

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

यमं सुदण्डहस्तं तु महिषासनसंस्थितम् ।
करालं कालवर्णं च फलपल्लवपाणिनम् ॥

(सुप्रभेदागमे अष्टचत्वारिंशत्तमपटले ॥)

पितृराजं प्रवक्ष्यामि नीलाञ्जनसमच्छविम् ।
दण्डं पाशं धनुर्दोर्भ्यां प्रदीप्ताग्निविलोचनम् ॥

महामहिषमारूढं सिंहासनमथापि वा ।
मृत्युना चित्रगुप्तेन पार्श्वयोरुपशोभितम् ॥

---

[1] 'धर्मशर्म समाह्वया' विति पाठान्तरम् ।

करालैः किंकरैश्चैव सुरासुरगणैस्तथा ।
धर्मिभिः पापिभिश्चैव सेव्यमानं निरन्तरम् ॥

(शिल्परत्नसंयोजिते कस्मिंश्चिद् ग्रन्थे ॥)

सजलाम्बुदसच्छायस्तप्तचामीकराम्बरः ।
महिषस्थश्च कर्तव्यस्सर्वाभरणवान् यमः ॥

नीलोत्पलाभां धूम्रोर्णां(धूमोर्णां?) वामोत्सङ्गे च कारयेत् ।
धूम्रोर्णा(धूमोर्णा?) द्विभुजा कार्या यमः कार्यश्चतुर्भुजः ॥

दण्डखड्गावुभौ कार्यौ यमदक्षिणहस्तयोः ।
ज्वाला त्रिशूला कर्तव्या त्वक्षमाला च वामके ॥

दण्डोपरि मुखं कार्यं ज्वालामालाविभूषणम् ।
धूम्रोर्णा(धूमोर्णा?)दक्षिणो हस्तो यमपृष्ठगतो भवेत् ॥

वामे तस्याः करे कार्यं मातुलुङ्गं सुदर्शनम् ।
पार्श्वे तु दक्षिणे तस्य चित्रगुप्तं तु कारयेत् ॥

आपीच्यवेषं स्वाकारं द्विभुजं सौम्यदर्शनम् ।
दक्षिणे लेखनी तस्य वामे पत्रं तु कारयेत् ॥

वामे पाशधरः कार्यः कालो विकटदर्शनः ।

(विष्णुधर्मोत्तरे ॥)

दण्डपाणिर्महादीप्तः कालाञ्जनसमच्छविः ।
महामहिषिकारूढो दीप्ताग्निसमलोचनः ॥

(पूर्वकारणागमे चतुर्दशपटले ॥)

लेखनीं पुस्तकं धत्ते कुक्कुटं दण्डमेव च ।
महामहिषमारूढो यमः कृष्णाङ्ग ईरितः ॥

(रूपमण्डने ॥)

निर्ऋतिः ।

निर्ऋतिर्नीलवर्णस्तु द्विभुजश्च महातनुः ।
खड्गं दक्षिणहस्तेन वामहस्तेन खेटकम् ॥

पीतवस्त्रधरं रौद्रं करालास्यं च दंष्ट्रिणम् ।
सर्वाभरणसंयुक्तं नानापुष्पैरलङ्कृतम् ॥

दुकूलवसनास्सर्वाः पीनोरुजघनस्तनाः ।
मध्यक्षामातिसौम्याश्च किञ्चित्प्रहसिताननाः ॥

नानागन्धानुलिप्ताङ्गा भद्रपीठोपरि स्थिताः ।
समभङ्गसमायुक्तास्सप्तसङ्ख्याप्सरास्स्मृताः ॥

अप्सरैश्च समायुक्तो निर्ऋतिश्च विशेषतः ।
निर्ऋतिस्त्वेवमाख्यातं वरुणस्त्वथ वक्ष्यते ॥

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

खड्गखेटकसंयुक्तं निर्ऋतिश्यामवर्णकम् ।
करालं विकृताकारं सिंहारूढं द्विनेत्रकम् ॥

(सुप्रभेदागमे अष्टचत्वारिंशत्तमपटले ॥)

राक्षसं संप्रवक्ष्यामि नैर्ऋते स्थितम् ।
नरयानसमारूढं रक्षि(क्षो ?)भिर्बहुभिश्श्रितम् ॥
कालमेघसमाभासं खड्गखेटकधारिणम् ।
पीतवस्त्रपरीधानं स्वर्णभूषाविभूषितम् ॥

(शिल्परत्नसंयोजिते कस्मिंश्चिद् ग्रन्थे ॥)

विरूपाक्षो विवृत्ता(वृता ?)स्यः प्राशु(प्रांशु ?)दंष्ट्रोज्ज्वलाननः ।
ऊर्ध्वकेशी खरस्थश्च द्विबाहुर्भीषणाननः ॥
कर्णेन कृष्णरक्ताङ्गः कृष्णाम्बरधरस्तथा ।
सर्वाभरणवान् दंष्ट्रासङ्घैर्दण्डधरस्तथा ॥
भार्याश्चतस्त्रः कर्तव्या देवी च निर्ऋतिस्तथा ।
कृष्णाङ्गी कृष्णवदना पाशहस्ता तु वामतः ॥

(विष्णुधर्मोत्तरे ॥)

राक्षसेशो विशालाक्षः पीतवस्त्रश्शवासनः ।
निर्ऋतिस्सुस्थितासीनः खड्गहस्तो महोज्ज्वलः ॥
निर्ऋतेराकृतिर्ह्येवं वरुणस्याकृतिं शृणु ।

(पूर्वकारणागमे चतुर्दशपटले ॥)

खड्गं च खेटकं हस्तैः कर्त्रिकां वैरिमस्तकम् ।
दंष्ट्राकरालवदनं श्वानारूढश्च राक्षसः ॥

(रूपमण्डने ॥)

वरुणः ।

वरुणश्शुक्लवर्णस्तु द्विभुजः पाशहस्तकः ।
सर्वाभरणसंयुक्तः करण्डमकुटान्वितः ॥
पीतवस्त्रधरश्शान्तो महाबलसमन्वितः ।
यज्ञसूत्रसमायुक्तो मकरस्थानकासनः ॥
(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

वरुणं पाशहस्तं तु शुक्लवर्णसमप्रभम् ।
अन्यहस्तेन वरदं सर्वाभरणभूषितम् ॥
(सुप्रभेदागमे अष्टचत्वारिंशत्तमपटले ॥)

सप्तहंसे रथे कार्यो वरुणो यादसां पतिः ।
स्निग्धवैदूर्यसंकाशः श्वेताम्बरधरस्तथा ॥
किंचित्प्रलम्बजठरो मुक्ताहारविभूषितः ।
सर्वाभरणवान् राजन्! महादेवश्चतुर्भुजः ॥
वामभागगतं केतुं मकरं तस्य कारयेत् ।
छत्रं तु सुसितं मूर्ध्नि भार्या सर्वाङ्गसुन्दरी ॥
वामोत्सङ्गगता कार्या मध्ये तु द्विभुजा नृप! ।
उत्पलं कारयेद्वामे दक्षिणे(णं?) देवपृष्ठगम् ॥
पद्मपाशौ करे कार्यौ देवदक्षिणहस्तयोः ।
शङ्खं च रत्नपात्रं च वामयोस्तस्य कारयेत् ॥

भागे तु दक्षिणे गङ्गा मकरस्था सचामरा ।
देवी पद्मकरा कार्या चन्द्रगौरी वरानना ॥

वामे तु यमुना कार्या कूर्मसंस्था सचामरा ।
नीलोत्पलकरा सौम्या नीलनीरजसन्निभा ॥

(विष्णुधर्मोत्तरे ॥)

शङ्खकुन्देन्दुधवलः पाशहस्तो महाबलः ।
केयूरकुण्डली हारी पीतवासास्सुशोभनः ॥

आसीनो वा स्थितो वापि मकरे वरुणस्स्मृतः ।

(पूर्वकारणागमे चतुर्दशपटले ॥)

वरं पाशौ त्पलं कुण्डी हस्तैर्बिभ्रत्क्रमाच्च यः ।
नक्रारूढः स कर्त्तव्यो वरुणः पश्चिमाश्रितः ॥

(रूपमण्डने ॥)

वायुः ।

द्विभुजस्तु महावीर्यस्ताम्राक्षो धूम्रसन्निभः ।
ध्वजं वै दक्षिणे हस्ते वामहस्ते तु दण्डधृक् ॥

कुञ्चितभ्रूयुतो वायुः श्वेताम्बरविभूषितः ।
नानाभरणसंयुक्तः केशाढ्यः केशैस्तु सुविकीर्णकः ॥

सिंहासनोपरिष्टात्तु शीघ्रयात्रोत्सुकः स्थितः ।
वायुरेवं समाख्यातो रुद्रलक्षणमुच्यते ॥

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

अनिलं धूम्रवर्णं तु मृगारूढं ध्रवं (धृत ?)ध्वजम् ।
सव्येऽङ्कुशधरं श्यामं चात्मानं विधिवद् गतम् ॥
(सुप्रभेदागमे अष्टाचत्वारिंशत्तमपटले ॥)

समीरणं प्रवक्ष्यामि सूत्रहरिणवाहनम् ।
पीताम्बरधरं देवं चित्ररत्नविभूषितम् ॥
वरदं दक्षिणं हस्तं वामहस्तं पताकयम् (या ?) ।
बिभ्राणं कुण्डलोपेतं किरीटवरधारिणम् ॥
(शिल्परत्नसंयोजिते कस्मिश्चिद् ग्रन्थे ॥)

वायुरम्बरवर्णस्तु तदाकाराम्बरो भवेत् ।
काष्ठपूरितचक्रस्तु द्विभुजो रूपसंयुतः ॥
गमनेच्छुशिवा भार्या तस्य कार्या च वामतः ।
कार्यो गृहीतचक्राङ्कः कराभ्यां पवनो द्विजः ॥
तथैव देवी कर्तव्या शिवा परमसुन्दरी ।
व्यावृतास्यस्तथा कार्यो देवो व्याकुलमूर्धजः ॥
(विष्णुधर्मोत्तरे ॥)

कुञ्चितभ्रूर्युवा वायुस्ताम्रदग् धूम्रसन्निभः ।
अङ्कुशेन करो वीर्यश्शम्बराम्बरसंयुतः ॥
मृगारूढो विधातव्यस्सर्वाभरणभूषितः ।
एवं सदागतिस्सर्वव्यापकोऽयं समीरणः ॥
(पूर्वकारणागमे चतुर्दशपटले ॥)

वरं ध्वजं पताका च कमण्डलुकरैर्दधत् ।
मृगारूढो हरिद्वर्म्म(र्णः ?) पवनो वायुदिक्पतिः ॥

(रूपमण्डने ॥)

धनदः ।

धनदस्सर्वयक्षेशस्सर्वाभरणभूषितः ।
तप्तकाञ्चनसङ्काशो हस्तद्वयसमन्वितः ॥

वरदाभयहस्तश्च गदां वै वामहस्तके ।
करण्डमकुटोपेतस्सितवासोत्तरीयकः ॥

दक्षभागे शङ्खनिधिर्वामे पद्मनिधिस्तथा ।
धनदस्य तु वामे तु देवीं कुर्य्यात्सलक्षणाम् ॥

पद्मपीठोपरिष्टात्तु द्विनेत्रो मेषवाहनः ।
रक्ताम्बरधरस्सौम्यश्शङ्खपद्मनिधिर्युतः ॥

शङ्खपद्मनिधी द्वौ च भूताकारौ महाबलौ ।
आसीनौ पद्मपीठे तु पद्महस्तौ द्विजोत्तम ! ॥

करण्डमकुटोपेतौ सितावासोत्तरीयकौ ।
धनदं ह्येवमाख्यातं प्राग्वद्रुद्रांश्च कल्पयेत् ॥

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

यक्षेशं तु गदाहस्तं श्यामरूपं भयावहम् ।
द्विबाहुं रक्तवस्त्राढ्यं रक्ताक्षं रक्तपाणिनम् ॥

(सुप्रभेदागमे अष्टचत्वारिंशत्तमपटले ॥)

हरमित्रं प्रवक्ष्यामि द्रव्यहारविभूषितम् ।
किरीटकुण्डलयुतं श्वेताम्बरविराजितम् ॥
नरयुक्तविमानस्थं गदापाणिं वरप्रदम् ।
महोदरं महाबाहुं गौरवर्णं मनोहरम् ॥
अष्टभिर्निधिभिर्युक्तं द्रविणव्यग्रपाणिभिः ।
समन्ताद् गुह्यकैर्युक्तं चित्रकर्मणि लेखयेत् ॥

(शिल्परत्नसंयोजिते कस्मिंश्चिद् ग्रन्थे ॥)

कर्तव्यः पद्मपत्राभो वरदो नरवाहनः ।
चामीकराभो वरदस्सर्वाभरणभूषितः ॥
लम्बोदरश्चतुर्बाहुर्वामपिङ्गललोचनः ।
आपीच्यवेषः कवची हारभारी मनोहरः ॥
द्वे च दंष्ट्रे मुखे तस्य कर्तव्ये श्मश्रुधारिणः ।
वामेन विभवा कार्या मौलिस्तस्यारिमर्दन ! ॥
वामोत्सङ्गगता कार्या वृद्धिर्देवी वरप्रदा ।
देवपृष्ठगतं पाणिं द्विभुजायास्तु दक्षिणम् ॥
रत्नपात्रधरं कुर्याद्वामं रिपुनिषूदन ! ।
गदाशक्ती च कर्तव्ये तस्य दक्षिणहस्तयोः ॥
सिंहार्कलक्षणं केतुं शिबिकामपि पादयोः (?) ।
शङ्खपद्मनिधी कार्यौ सरूपौ निधिसंस्थितौ ॥

शङ्खपद्माञ्जलिक्रान्तं वदनं तस्य पार्श्वयोः (?) ।

(विष्णुधर्मोत्तरे ॥)

मकुटी कुण्डली हारी केयूरी नरवाहनः ।
यक्षराजः कुबेरोऽयं तप्तकाञ्चनसन्निभः ॥
शङ्खपद्मनिधीयुक्तो गदाहस्तो निधीश्वरः ।

(पूर्वकारणागमे चतुर्दशपटले ॥)

गदानिधीबीजपूरकमण्डलुधरः करैः ।
गजारूढः प्रकर्त्तव्यः सौम्ययो (?)नरवाहनः ॥

(रूपमण्डने ॥)

ईशः ।

ईशो वै द्विभुजश्शान्तस्सर्वाभरणभूषितः ।
जटामकुटसंयुक्तश्शुक्लवस्त्रद्युतिः स्थितः ॥
शुक्लयज्ञोपवीतश्च शुक्लपद्मोपरि स्थितः ।
शूलं दक्षिणहस्ते तु कपालं वामहस्तके ॥
ईशानमेवमाख्यातं ततो वै भास्कराकृतिः ।

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

ईशानं तु चतुर्बाहुं त्रिनेत्रं तु जटाधरम् ।
शूलपाणिं वृषारूढं वरदाभयपाणिनम् ॥

(सुप्रभेदागमे अष्टचत्वारिंशत्तमपटले ॥)

ईशानं संप्रवक्ष्यामि शारदेन्दुसमप्रभम् ।
शुभ्रं वृषभमारूढं बालेन्दुकृतशेखरम् ॥

जटामण्डलभूषाढ्यं लोचनत्रयभूषितम् ।
त्रिशूलपाणिं वरदं व्याघ्रचर्माम्बरावृतम् ॥

मणिकुण्डलभूषाढ्यं नागयज्ञोपवीतिनम् ।
लिखेदेवंविधं देवं चित्रकं चित्रकोविदः ॥

(शिल्परत्नसंयोजिते कस्मिंश्चिद् ग्रन्थे ॥)

वृषारूढो महाराजो धवलः पिङ्गलेक्षणः ।
त्रिशूलपाणिरीशानस्त्रिनेत्रो लोकशङ्करः ॥

(पूर्वकारणागमे चतुर्दशपटले ॥)

वरं तथा त्रिशूलं च भागेद्र(?)बीजपूरकम् ।
बिभ्राणो वृषभारूढ ईशानो धवलद्युतिः ॥

(रूपमण्डने ॥)

अश्विन्यादिमूर्त्त्यन्तराणि ।

अश्विन्यादिमूर्त्यन्तराणि ।

अश्विनीदेवते ।

एकसिंहासनासीनावश्विन्यावश्वरूपिणौ ।
दाडिमीपुष्पसङ्काशावुभयौ सोपवीतिनौ ॥
फुल्लरक्तोत्पलाक्षौ च पीतस्रग्वस्त्रधारिणौ ।
नासत्योदस्रनामोक्त[1] जटामकुटधारिणौ ॥
करद्वयसमायुक्तौ श्रीभूषणविभूषितौ ।
अभयं दक्षिणं हस्तं पुस्तकं वामहस्तके ॥
लम्बितं दक्षिणं पादं वाममुत्कुटि(त्कटु?)कासनम् ।
देवानां भिषजावेतौ तौ चिकित्साविधायिनौ ॥
तयोश्च पार्श्वयोर्विप्र! दक्षिणेऽदक्षिणे क्रमात् ।
मृतसञ्जीविनी चैव संज्ञितौ(?) चामरोद्धृतौ ॥
पृष्ठे विशल्यकरणी द्वे स्त्रियोपेतपिङ्गलौ(?) ।
वामे धन्वन्तरिश्चैव आत्रेयश्च तथैव च ॥
पीतरक्तनिभावेतौ विधेयौ कृष्णवाससौ ।
खड्गखेटकहस्तौ तौ सर्वाभरणभूषितौ ॥

---

[1] 'नासत्यदस्रनामाना' विति पाठान्तरम् ।

अश्विनाविति विख्यातौ वह्निः पूर्ववदेव हि ।

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

नासत्यश्चैव दस्रश्च अश्विनौ तौ प्रकीर्तितौ ।

शुक्लवस्त्रधरोष्णीषौ पुस्तकाभयपाणिनौ ॥

सोत्तरीयौ सुरूपौ च शुक्लहेमनिभौ तथा ।

(सुप्रभेदागमे अष्टचत्वारिंशत्तमपटले ॥)

एकसिंहासनासीनावश्विनावश्वरूपिणौ ।

दाडिमीपुष्पसङ्काशावुभौ तौ सोपवीतकौ ॥

फुल्लरक्तोत्पलाक्षौ च पीतस्रग्वस्त्रधारिणौ ।

करद्वयसमायुक्तौ श्रीभूषणविभूषितौ ॥

अभयं दक्षिणे हस्ते वरदं वामहस्तके ।

लम्बितं दक्षिणं पादं वाममुत्कुटि(त्कटु?)कासनम् ॥

(शिल्परत्ने पञ्चत्रिंशपटले ॥)

पद्मपत्रसवर्णाभौ पद्मपत्रसमाम्बरौ ।

द्विभुजौ देवभिषजौ कर्तव्यौ देहसंयुतौ ॥

सर्वाभरणसंपन्नौ विशेषाच्चारुलोचनौ ।

तयोरोषधयः कार्या दिव्या दक्षिणहस्तयोः ॥

वामयोः पुस्तके कार्ये दर्शनीये तथा नृप ! ।

एकस्य दक्षिणे पार्श्वे वामे चान्यस्य यादव ! ॥

नारीयुगं प्रकर्तव्यं सुरूपं चारुदर्शनम् ।
तयोश्च नामनी प्रोक्ते रूपसंपत्तथाकृतिः ॥

मधूकपुष्पसंकाशा रूपसंपत्प्रकीर्तिता ।
आकृतिः कथिता लोके शरकाण्डनिभा तथा ॥

रत्नभाण्डकरे कार्ये चन्द्रशुक्लाम्बरे तथा ।

(विष्णुधर्मोत्तरे ॥)

उभयोस्(यो or यां?)सोपवीतौ तौ चूडामकुटधारिणौ ।
फुल्लरक्तोत्पलाक्षौ च पीतस्रक्शुक्लवस्त्रकौ ॥

अश्विन्याकृतिरेवं तु सूर्याकृतिं शृणुष्वथ ।

(पूर्वकारणागमे त्रयोदशपटले॥)

वसवः ।

धरो ध्रुवश्च सोमश्च आपस्त्वनल एव च ।
अनिलः प्रत्युषश्चैव प्रभावश्च तथैव च ॥

वसवश्चाष्टकास्त्वेते रक्तवर्णा द्विबाहवः ।
पीताम्बरधरास्सर्वे आसीनो वा स्थितोऽपि वा ॥

खड्गखेटकहस्तास्ते सर्वाभरणभूषिताः ।
करण्डमकुटोपेता रौद्रास्सर्वे प्रकीर्तिताः ॥

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

धरो ध्रुवस्तथा सोमस्सावित्रस्त्वनिलोऽनलः ।
प्रत्युषश्च प्रभावश्च सुदंष्ट्रा भीमरूपकाः ॥
खड्गखेटकहस्तास्तु कुञ्चितभ्रूसुलोचनाः ।
सर्वाभरणसंयुक्ताश्चित्रवस्त्रधरास्तथा ॥
रक्तवस्त्रधराः पीताः प्रोक्ता वैवस्वतास्त्विह ।

(सुप्रभेदागमे अष्टचत्वारिंशत्तमपटले ॥)

अथातस्संप्रवक्ष्यामि वसुरूपाणि ते जय ! ।
पद्माक्षमालिके तस्य दक्षवामकरद्वये ॥
सीरशक्ती दधानोऽयं धराख्यो वसुरादिमः ।
माला पुष्करबीजोत्था चक्रं शक्तिं कमण्डलुम् ॥
दक्षाधरादिसिक्येन(?) यस्य स्युस्स ध्रुवो मतः ।
मुक्ताफलकृता माला पङ्कजं शक्तिरङ्कुशः ॥
स वसुः कीर्तितो वत्स ! सोमनामेति वै बुधैः ।
सव्यवामोर्ध्वगौ यस्य करौ स्तश्शक्तिसंयुतौ ॥
सीराङ्कुशान्वितौ चाधः स भवेदापसंज्ञकः ।
अक्षमालोपवीत्यूर्ध्वे सृणिशक्तिकरावधः ॥
यस्य स्तस्सोऽनिलाख्यस्स्याच्छुभदः पञ्चमो वसुः ।
स्रुवाक्षमालिके दक्षे वामे शक्तिकपालभृत् ॥
सव्योर्ध्वादिक्रमाद्योऽसौ नलाख्यस्तु वसुस्स्मृतः ।
खड्गा(ङ्गा ?)ङ्कुशधरस्सव्ये शक्तिखेटकरोऽन्यतः ॥

प्रत्यूषाख्यो वसुश्चायं सप्तमः परिकीर्तितः ।
सव्ये दण्डकपालोऽसौ वामे तु सृणिशक्तिकः ॥
शुभदः कीर्तितश्चायं प्रभासो वसुरष्टमः ।
एते सर्वे समाख्याता नवकाञ्चनसन्निभाः ॥
धरो ध्रुवश्च सोमस्त्या(श्चा ?)पश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ॥

(विश्वकर्मशास्त्रे ॥)

धरो ध्रुवश्च सोमश्च आपश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभावश्च वसवश्चाष्ट एव च ॥
द्विभुजाश्च द्विनेत्राश्च असिखेटकसंयुताः ।
रक्तवर्णा इमे सर्वे पीतवस्त्रसमन्विताः ॥
सर्वाभरणसंयुक्ताः स्निग्धकुन्तलमूर्धजाः ।
वसूनामाकृतिर्ह्येवमखमूर्त्याकृतिं शृणु ॥

(पूर्वकारणागमे चतुर्दशपटले ॥)

नागदेवः ।

त्रिनेत्रं चतुर्भुजं सौम्यं रक्ताभं सितवाससम् ।
अभयवरदोपेतं परहस्ते तु नागधृक् ॥
करण्डमकुटोपेतं नागं पञ्चफणान्वितम् ।
सर्वाभरणसंयुक्तं पद्मपीठोपरि स्थितम् ॥

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

नागाः ।

नागानां वक्ष्यते रूपं नाभेरूर्ध्वं नराकृतिः ।
सर्पाकारमधोभागं मस्तके भोगमण्डलम् ॥

एकं फणात्रयं वापि पञ्च वा सप्त वा नव ।
द्विजिह्वास्ते विधातव्याः खड्गचर्मकरैर्युताः ॥

(शिल्परत्ने पञ्चविंशाध्याये ॥)

श्वेतदेहश्च कर्तव्यस्स्फुरन्मौक्तिकसन्निभः ।
रक्ताङ्गस्स्वस्तिकोपेतस्सुतेजास्तक्षको महान् ॥

कृष्णः कार्कोटकः कण्ठे शुक्लरेखात्रयान्वितः ।
रक्तपद्मनिभः पद्मः शिरश्शुक्लस्सविद्रुमः ॥

शङ्खवर्णो महापद्मो मस्तके कृष्णशूलधृक् ।
हेमाभश्शङ्खपालस्स्यात् सितरेखाधरो गळे ॥

कुलिको रक्तदेहस्तु चन्द्रार्धकृतमस्तकः ।
द्विजिह्वा बाहुवत्सप्तफणामणिसमन्विताः ॥

अक्षसूत्रधरास्सर्वे कुण्डिकापुच्छसंयुताः ।
एकभोगास्त्रिभोगा वा द्वेतज्जातास्सुतादयः ॥

(मयः ॥)

साध्याः ।

साध्याः पद्मासनगताः कमण्डल्वक्षसूत्रिणः ।
धर्मपुत्रा महात्मानो द्वादशामरपूजिताः ॥

(ब्रह्माण्डपुराणे ॥)

असुराः ।

किरीटकुण्डलोपेतास्तीक्ष्णदंष्ट्रा भयानकाः ।
नानाशस्त्रधराः काक्षा दैत्यास्सुरगणद्विषः ॥

दानवा विकृताकारा भ्रुकुटीकुटिलाननाः ।
करिभेन(?) च कुब्जेन मण्डिताश्शस्त्रपाणयः ॥

दंष्ट्राकरालवदना भ्रुकुटीकुटिलेक्षणाः ।
नानारूपा महाकाया नानाशस्त्रधरास्तथा ॥

(शिल्परत्ने पञ्चविंशाध्याये ॥)

अप्सरसः ।

रम्भा च विपुला चैव उर्वशी च तिलोत्तमा ।
मध्यक्षामसमायुक्ताः पीनोरुजघनस्तनाः ॥

(सुप्रभेदागमे अष्टचत्वारिंशत्तमपटले ॥)

दुकूलवसनास्सर्वाः पीनोरुजघनस्तनाः ।
मध्ये क्षौबादिवर्णाव(?)तिसौम्याश्च किंचित्प्रहसिताननाः ॥

नानालङ्कारसंयुक्ता भद्रपीठोपरि स्थिताः ।
समभङ्गसमायुक्तास्ससप्तसङ्ख्याप्सरो(?) स्मृताः ॥

(शिल्परत्ने पञ्चविंशपटले ॥)

पिशाचाः ।

उत्पर्वकृशकायास्ते चर्मास्थिस्नायुविग्रहाः ।
ह्रस्वकीर्णशिरोजास्स्युः पिशाचाश्चित्रकर्माणि ॥

वेताला: ।

ईदृक्ता(शा?) एव वेताला दीर्घदेहा: कृशोदरा: ।
कपोलै: पूर्वजैर्युक्ता लेखनीया मनीषिभि: ॥

(शिल्परत्ने पञ्चविंशाध्याये ॥)

पितर: ।

पितर: पीतवर्णाभा: वृद्धास्ते केशबन्धिता: ।
यज्ञसूत्रसमायुक्ता द्विभुजा: श्वेतवासस: ॥
नानाभरणसंयुक्ता भस्मोद्धूलितविग्रहा: ।
सितदन्तसमायुक्ता: सौम्यदृक्पातनान्विता: ॥
फलके भद्रपीठे वा पितरस्तु महात्मन:(?) ।
वामजानूपरिन्यस्तवामहस्तसमन्विता: ॥
सूची दक्षिणहस्ते तु पितरस्त्रय उच्यते(?) ।
पितरस्तु समाख्याता: शृणु वैवस्वतं तत: ॥

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

पिता पितामहो चैव(ह्यैव?) प्रपितामह एव च ।
पितरस्स्तूयमानास्तु तेषां वै लक्षणं शृणु ॥
सुदढा पीतक(व?)र्णास्तु छत्रदण्डधरास्तथा ।
शुक्लवस्त्रै: परिच्छन्ना: कीर्तिता: पितरस्त्रय: ॥

(सुप्रभेदागमे अष्टचत्वारिंशत्तमपटले ॥)

पितरः पीतवर्णाभा द्विभुजाः श्वेतवाससः ।
यज्ञसूत्रसमायुक्तास्सौम्यदृग्वदनान्विताः ॥
फलके भद्रपीठे वा त्रयस्तु सहिताननाः(सनाः ?) ।

(शिल्परत्ने पञ्चविंशपटले ॥)

कुशपत्रविष्टरस्थाः पितरः पिण्डपात्रिणः ।

(विष्णुधर्मोत्तरे ॥)

सप्तर्षयः ।

ऋषयः पीतवर्णास्तु नानावर्णान्विताम्बराः ।
वृद्धाश्च द्विभुजाश्शान्ता जटामकुटमण्डिताः ॥
चिबुका हृदयान्ताश्च उपवीतसमन्विताः ।
भस्मना च त्रिपुण्ड्रास्यास्स्थानका वासनास्तु वा ॥
दण्डं दक्षिणहस्ते तु छत्रं वामकरे धृतम् ।
छत्रदण्डं विना वापि सव्यं वै ज्ञानमुद्रिका ॥
वामजानूपरिन्यस्तवामहस्तसमन्विताः ।
मनुस्त्वगस्त्य इत्युक्तो वसिष्ठो गौतमस्तथा ॥
अङ्गिरास्स्याद्विश्वामित्रः भरद्वाज इति स्मृताः ।
एते वै सप्त ऋषयः कीर्तिताश्च विशेषतः ॥

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

भृगुश्चैव वसिष्ठश्च पुलस्त्यः पुलहः क्रतुः ।
काश्यपः कौशिकश्चैव अङ्गिरा मुनयस्त्विमे ॥

सुवल्कला जटायुक्तास्सुमुखा दंशहस्तकाः ।
कक्ष्या च मण्डिताकारास्शुक्लवस्त्रधरास्शुभाः ॥

पिङ्गलाश्च सुनेत्राश्च पत्नयस्सप्त कीर्तिताः ।

(सुप्रभेदागमे अष्टाचत्वारिंशत्तमपटले ॥)

अगस्त्यश्च पुलस्त्यश्च विश्वामित्रः पराशरः ।
जमदग्निश्च वाल्मीकी सनत्कुमारश्च सप्त च ॥

शुक्लवस्त्रधरास्सर्वे शुक्लयज्ञोपवीतकाः ।
शुक्लवस्त्रोत्तरीयाश्च जटावल्कलसंयुताः ॥

कमण्डल्वक्षहस्ताश्च दीर्घश्मश्रुसमन्विताः ।
ऋषीणामाकृतिः प्रोक्ता अश्विन्याकृतिरुच्यते ॥

(पूर्वकारणागमे त्रयोदशपटले ॥)

कौशिकः ।

अगस्त्यवत्कौशिकं च स्थापयेत्स्थापकोत्तमः ।

भृगुः ।

भृगुः शुक्लनिभश्शान्तश्शुक्लवस्त्रधरस्तथा ।
करण्डमकुटोपेतो हस्तद्वयसमन्वितः ॥

अभयवरदोपेतस्सर्वाभरणभूषितः ।
स्थानकं वासनं वापि पद्मपीठे भृगुश्शुचिः ॥

मरुद्गणाः ।

मरुद्गणा धूम्रवर्णा द्विभुजात्यन्तसुन्दराः ।
केशभारसमायुक्तास्सर्वाभरणभूषिताः ॥
दुकूलवसनास्सर्वे नानापुष्पैरलङ्कृताः ।
अभयवरदोपेता टङ्कशूलसमन्विताः ॥
स्थानकाः पद्मपीठे तु शुक्लवस्त्रधराश्शुभाः ।

(अंशुमद्भेदागमे एकोनपञ्चाशपटले ॥)

INDEX

INDEX.

INDEX.

INDEX.

INDEX.

INDEX.

4

INDEX.

INDEX.